CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

11.3

श्रीमते रामानुजाय नमः

श्री १०८ परमहंसबलभद्रदासविरचितौ

ब्रह्ममुखपरिचयतत्त्वचिन्तामणी

295

प्रकाशकः—

न्यायाचार्य पं० श्री रामरत्नदासो न्यायाध्यापकः

वासुदेवाचारि महाविद्यालयः

तरेतपाली, पाटलिपुत्रः

मुद्रकः—

काशीराजमुद्रणालयः

रामनगर-दुर्गः, काशी ।

मूल्यं ।=) आणक-षट्कम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

C-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वामी विवेकानन्द

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2



श्री १०८ परमहंस वलभद्र दास जी

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ भूमिका

श्रीमते रामानन्दाय नमः ।

श्रीरामं सीतया सार्धं लक्ष्मणादिसमन्वितम् ।
प्रणमामि हि भक्त्याऽहमाचार्यौ रामलक्ष्मणः ॥१॥

अयि विविधविद्याविलासोल्लासितमानसभूमिका महानुभावा विद्वद्वराः !

विदितचरमेव तत्रभवतां श्रीमतां यदिह "धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टय-सम्पत्तिर्हि वेदार्थज्ञानाधीनैव"। नह्यत्र केषांचिदपि विप्रतिपत्तिः कस्मिंश्चिदपि काले।

वेदश्च "मन्त्रब्राह्मणयोर्वेदनामधेयम्" "ईश्वरेण वेद्यन्ते ज्ञाप्यन्ते धर्मार्थ-काममोक्षाख्याः पुरुषार्था येन स वेदः" 'धर्मे प्रमीयमाणे हि वेदेन करणात्मना इतिकर्तव्यताभागं मीमांसा पूरयिष्यति" "अपौरुषेयं वाक्यं वेदः" इष्टप्राप्त्यनि-ष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः" प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एवं वदन्ति वेदेन तस्माद्वेदस्य वेदता" "इह खलु निखिलपुमर्थानर्थ-साधनभूतौ धर्माधर्मौ साङ्गोपाङ्गवेदाध्ययनसमधिगम्यौ" इत्याद्यापस्तम्बाद्युक्ते-र्मन्त्रब्राह्मणोभयात्मकः कर्मज्ञानोपासनाप्रतिपादको ग्रन्थविशेष एव। तत्र देव-द्रव्योभयसाध्यो यागादिरेव कर्मपदवाच्यः। सच्चिदानन्दानां प्रकृतिपुरुषपुरुषोत्त-मानां याथार्थ्येन बोध एवात्र ज्ञानपदशक्यः। पुरुषोत्तमब्रह्म-पुरुषजीवयोरुपा-स्योपासकत्वदृष्टिरेवात्रोपासनाशब्दार्थः। एवञ्च भागद्वयवति वेदे ज्ञानोपासनाप्रति-पादको ब्राह्मणरूपोपनिषद्भागः। कर्मप्रतिपादकश्चोपनिषद्भिन्नो वेदभागः। तत्रा-ङ्गानि च "शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा। कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः" इति वचनोद्धृतानि षडेव। उपाङ्गानि पुनः "पुराणं न्यायो मीमांसा धर्मशास्त्रञ्च"-ति चत्वारि। उपवेदाश्च "ऋग्वेदस्यायुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्यार्थशास्त्रञ्च" इत्याहुः पूर्वाचार्या व्यासादयः। एवञ्च रामायणमहाभारतादिसद्ग्रन्थानामपि स्मृतिष्वेवान्तर्भूतत्वं विज्ञेयम्। तत्रोपाङ्गेषु न्यायपदेन गोतमप्रणीतन्यायशास्त्रस्य कणादप्रणीतवैशेषिक-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शास्त्रस्य च ग्रहणम् (एवञ्च मीमांसापदेन जैमिनिकृत-धर्ममीमांसाया व्यासकृत-ब्रह्ममीमांसायाश्च ग्रहणं विवक्षितम् । इत्थञ्चः—

"पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ॥
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥"

या० स्मृ० अ० १, श्लो० ३.

"श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥
सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम् ॥"

या० स्मृ० अ० १, श्लो० ७

"वेदोऽखिलोधर्ममूलं स्मृतिशीले च तद्विदाम् ॥
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ॥ ६ ॥
श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः ॥
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ॥ ९ ॥
श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः ॥
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ ॥१०॥
वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ॥
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ॥१२॥"

इति मनुस्मृतौ । द्वि० अध्याये ।

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ॥
पुराणं धर्मशास्त्रञ्च विद्या ह्येताश्चतुर्दश ॥२८॥
आयुर्वेदो धनुर्वेदो गान्धर्वश्चैव ते त्रयः ॥
अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव ताः ॥२९॥"

इति विष्णुपुराणे अ० ३, अ० ६ ।

"अष्टादशपुराणानि रामस्य चरितं तथा ॥
विष्णुधर्मादिशास्त्राणि शिवधर्माश्च भारत ॥८७॥
कार्ष्णञ्च पञ्चमं वेदं यन्महाभारतं स्मृतम् ॥
सौराश्च धर्मा राजेन्द्र ? मानवोक्ता महीपते ?॥८८॥
तथेति नाम येषाञ्च प्रवदन्ति मनीषिणः ॥१॥"

इति भविष्यपुराणे अ० ४ ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्याद्युक्तिरपि संगच्छते । ननु उक्तासु चतुर्दशसु अष्टादशसु वा विद्यासु कस्यामपि विद्यायां कापिलसांख्यशास्त्रस्य पातञ्जलयोगशास्त्रस्य च संज्ञाया अनुपलब्ध्या हि कथं तयोः प्रामाण्यमिति चेन्न, पूर्वोक्तासु विद्यासु अनेकात्मप्रतिपादकत्वसाम्यान् न्यायवैशेषिकशास्त्रवत् सांख्ययोगादिशास्त्राणामपि न्यायविस्तरपदेन संगृहीतत्वात् "सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।" "एकं सांख्यञ्च योगं च यः पश्यति स पश्यति ।" "तत्कारणं सांख्ययोगाधिगम्यम् ।" इत्यादि श्रीमद्भगवद्गीताद्युक्तेश्च । तत्र मन्त्रा द्विविधाः—वैदिकाः, तान्त्रिकाश्चेति । वैदिकाश्चापि मन्त्रा द्विविधा—प्रगीताः, अप्रगीताश्चेति । तत्र प्रगीता सामानि । अप्रगीताः पुनर्द्विविधाः छन्दोबद्धास्तद्विलक्षणाश्चेति । प्रथमा ऋचः । अन्त्या यजूंषि । नियतवर्णपदा ऋक् । ऋग्बाहुल्यविशिष्टो वेदः ऋग्वेदः इति यावत् । अनियतवर्णपदं यजुः । निगदो यजुर्विशेषः । ऋग्यजुषोरविवक्षया गानप्राधान्यविशिष्टो वेदः सामवेदः। ऋग्यजुषोरविवक्षया शान्तिकपौष्टिकप्राधान्यविशिष्टो वेदोऽथर्ववेदः, इति भावः । विधिरर्थवादोऽनुवादश्च ब्राह्मणम् । तच्च ब्राह्मणम् "अष्टविधम्, इतिहासः—पुराणम्—विद्या-उपनिषदः—श्लोकाः—सूत्राणि—व्याख्यानानि—अनुव्याख्यानानि" इति श्रीविद्यारण्यैः स्वामिभिस्तैत्तिरीयोपनिषट्टीकायां दीपिकायामुक्तम् । तत्र विधिर्नाम अज्ञातार्थबोधकं वाक्यम् । स च विधिश्चतुर्विधः-उत्पत्तिविधिः-विनियोगविधिः-प्रयोगविधिः अधिकारविधिश्चेति । तत्र कर्मस्वरूपमात्रबोधको विधिः—उत्पत्तिविधिः । अङ्गप्रधानसम्बन्धबोधको विधिः विनियोगविधिः । प्रयोगप्राशुभावबोधको विधिः, अङ्गानां क्रमबोधको विधिर्वा—प्रयोगविधिः कर्मजन्यफलस्वाम्यबोधको विधिः अधिकारविधिः । पुनश्च विधिस्त्रिविधः—अपूर्वविधिः, नियमविधिः परिसंख्याविधिश्चेति । यथाहुराचार्याः "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति । तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" इति । अर्थात्—प्रमाणान्तरेणाप्राप्तस्य प्रापको विधिः, अपूर्वविधिः । नानासाधनसाध्यक्रियायामेकसाधनप्राप्तौ सत्यामप्राप्तस्यापरसाधनस्य प्रापको विधिर्नियमविधिः । उभयोश्च युगपत्प्राप्तौ सत्यामितरव्यावृत्तिपरको विधिः परिसंख्याविधिः । सा च परिसंख्या द्विधा श्रौती, लाक्षणिकी चेति ।

अर्थवादः—प्राशस्त्यनिन्दाऽन्यतरपरं वाक्यम् । स द्विविधः—विधिशेषो निषेधशेषश्चेति । स पुनस्त्रिधा । तदुक्तमाचार्यैः-विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः" इति । अर्थात् प्रमाणान्तर-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विरोधे सत्यर्थवादो गुणवादः । प्रमाणान्तरावगतार्थबोधकोऽर्थवादः—अनुवादः । प्रमाणान्तरविरोधतत्प्राप्तिरहितार्थबोधकोऽर्थवादः—भूतार्थवादः । तथा च "विधि-मन्त्रनामधेयनिषेधार्थवादादिमीमांसापूर्वकं वेदार्थनिर्णयः कर्तव्यः ।" तत्र—'विधीनामनुष्ठानविधायकत्वेन, मन्त्राणामनुष्ठेयार्थस्मारकत्वेन, उद्भिदादिवाक्यानां नाम्ना विधेयार्थपरिच्छेदकत्वेन, निषेधानां विधेयार्थसंकोचकत्वेन, अर्थवादानां विधेय-प्राशस्त्यादिसम्पादकत्वेन, चार्थवत्त्वमिति तात्पर्यम् ।'

तत्र वेदादिप्रचारप्रसारक्रमश्चेत्थम् :—तथाहि-परमकारुणिकः सकललोकहितैषी सच्चिदानन्दघनः सर्वज्ञः सर्वशक्तिमान् निखिलशास्त्रयोनिः सत्यसंकल्पः सकलजग-दाधारपुरुषोत्तमः श्रीभगवान्, आध्यात्मिकाधिदैविकाधिभौतिकदुःखत्रयसन्तप्तानां जनानामुद्धाराय धर्मादिसंस्थापनाय च धृतविविधावतारः सन् सकलदुःखप्रशमनाय यदृच्छया चतुर्मुखं ब्रह्माणं सृष्ट्वा तस्मै ब्रह्मणे कर्मज्ञानोपासनाप्रतिपादकान्, आदर्श-स्थानीयान् सकलविधोपबृंहितान् पूर्वं पूर्वं युगस्थान् ऋग्यजुः सामाथर्वाख्यान् सषडङ्गान् चतुरो वेदानुपदिदेश ।

"यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमात्म-बुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये" इति श्वेताश्वतरोपनिषच्छ्रुतेः । "जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् । तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सू-रयः ॥ तेजोवारिमृदां यथा विनिमयोः यत्र त्रिसर्गो मृषा धाम्ना स्वेन सदा निरस्त-कुहकं सत्यं परं धीमहि" इति श्रीमद्भागवतमहापुराणोक्तेश्च ।

चतुर्मुखोऽपि ब्रह्मा तदुपदेशक्रमेणैव जगत्सृष्ट्वा वेदोक्तान्येव नामानि तत्तज्जात्य-नुगुणानि निर्माय, अध्ययनाध्यापनरक्षणादिरूपाणि तानि तानि योग्यानि कर्माणि ताभ्यः ताभ्यः प्रजाभ्यः उपदिदेश ।

तथा च स्मृतिः "अनादिनिधना ह्येषा वागुत्सृष्टा स्वयंभुवा । आदौ वेदमयी दिव्या यतः सर्वाः प्रसूतयः" इति ।

सर्वेषां स तु नामानि कर्माणि च पृथक् पृथक् ।
वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे ॥

इति च म० स्मृतिः ॥

तैर्वेदादिभिः प्रतिपादितानां कर्मज्ञानोपासनानां मध्ये कर्मशब्देन "गर्भाधा-नपुंसवनसीमन्तोन्नयनं जातकर्मनामकरणान्नप्राशनं चौलोपनयनं चत्वारि वेदव्रतानि

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामे-तेषाञ्चाष्टकापार्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः, अग्न्या-धेयमग्निहोत्रं दर्शपौर्णमासौ आग्रहायणं चातुर्मास्यानि निरूढपशुबन्धसौत्रामणीति सप्त हविर्यज्ञसंस्थाः अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोडशी वाजपेयातिरात्राऽऽप्तोर्याम इति सप्तसोमयज्ञसंस्थाः" इत्येते चत्वारिंशत्संस्काराः ।

अथाष्टावात्मगुणाः "दया सर्वभूतेषु क्षान्तिरनसूयाशौचमनायासो मंगलम-कार्पण्यमस्पृहा" इति ।

इति गौतमस्मृतौ अष्टमाध्याये ।

"गर्भाधानं पुंसवनं सीमन्तो जातकर्म च ।
नामक्रिया निष्क्रमणोऽन्नाशनं वपनक्रिया ।
कर्णवेधो व्रतादेशो वेदारम्भक्रियाविधिः ॥
केशान्तः स्नानमुद्वाहो विवाहाग्निपरिग्रहः ।
त्रेताग्निसंग्रहश्चेति संस्काराः षोडश स्मृताः ॥

इति व्यासस्मृतौ प्रथमाध्याये ।

अथ संस्कारकथनम् ।

अग्निरुवाच ।

"निर्वाणादिषु दीक्षासु चत्वारिंशत्तथाष्ट च ।
संस्कारान् कारयेद् धीमान् शृणु तान् यैः सुरो भवेत् ॥
गर्भाधानं तु योन्यां वै ततः पुंसवनं चरेत् ।
इत्यादि क्रमेण.................................. ॥
संस्कारैः संस्कृतश्चैतैर्भुक्तिं मुक्तिमवाप्नुयात् ।
सर्वरोगादिनिर्मुक्तो देववद् वर्तते नरः ॥
जप्याद्धोमात्पूजनाच्च ध्यानाद्देवस्येष्टभाक् ॥"

इत्यन्तेन ग्रन्थेन आग्नेये महापुराणे द्वात्रिंशेऽध्याये ।

(१) गर्भाधानम् (२) पुंसवनम् (३) सीमन्तः (४) विष्णुबलिः (५) जातकर्म (६) नामकरणम् (७) उपनिष्क्रमणम् (८) अन्नप्राशनम् (९) कर्णवेधः (१०) चौलम् (११) अक्षरस्वीकरणम् (१२) उपनयनम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(१३) व्रतम् (१४) समावर्तनम् (१५) विवाहः (१६) उपाकर्म (१७) उत्सर्जनम् ॥

अथ सप्त पाकयज्ञसंस्थाः

(१८) हुतम् (१६) प्रहुतम् (२०) आहुतम् (२१) शूलगवः (२२) बलिहरणम् (२३) प्रत्यवरोहणम् (२४) अष्टका होमः ॥

इति सप्त पाकयज्ञसंस्थाः ।

अथ सप्त हविर्यज्ञसंस्थाः

(२५) अग्न्याधानम् (२६) अग्निहोत्रम् (२७) दर्शपूर्णमासौ (२८) चातुर्मास्यानि (२९) आग्रहायणेष्टिः (३०) निरूढपशुबन्धः (३१) सौत्रामणिः

इति सप्त हविर्यज्ञसंस्थाः

अथ सप्त सोमयज्ञसंस्थाः

(३२) अग्निष्टोमः (३३) अत्यग्निष्टोमः (३४) उक्थ्यः (३५) षोडशी (३६) वाजपेयः (३७) अतिरात्रः (३८) आप्तोर्यामः

इति सप्त सोमयज्ञसंस्थाः

(३९) वानप्रस्थ्यम् (४०) सन्यासः

अथ सप्तात्मगुणाः

(४१) दया (४२) अनसूया (४३) शौचम् (४४) अनायासः (४५) माङ्गल्यम् (४६) अकार्पण्यम् (४७) अस्पृहा

इति सप्तात्मगुणाः

(४८) अन्त्येष्टिः

इति अष्टाचत्वारिंशत्संस्काराः

अथ उत्तरक्रतवः

(१) राजसूयः (२) गवानयनम् (३) गोसवः (४) अश्वमेधः (५) आङ्गिरसक्रतुः (६) शाकमेधः (७) पञ्चशारदीयः (८) विश्वजित् (९) पौण्डरीकम् (१०) भर्तृद्वादशाहम् (११) संवत्सरसत्रम् (१२) महाव्रतम् (१३) रात्रिसत्रम् (१४) शतरात्रम् (१५) स्तोमः (१६) द्वादशसंवत्सरक्रतुः (१७) सहस्रसंवत्सरक्रतुः । एवमन्येऽपि क्रतवो बोध्याः ॥

इति लघुत्रिमुनिकल्पतरुपूर्वभागे च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इति पूर्वोक्तगौतमादिस्मृतिप्रभृत्युक्तानि तानि तानि कर्माणि लोके यथाधिकारं धर्मार्थकामाभिलाषिभिः बुभुक्षुभिः पुरुषैः सकामतया तत्तत्कालानुसन्धानपूर्वकमनुष्ठेयानि सन्ति ।

शुष्कज्ञानिभिः कैवल्यार्थिभिः मुमुक्षुभिः पुरुषैः सत्त्वशुद्ध्यर्थतया निष्कामभावनापुरःसरमेवानुष्ठेयानि भवन्ति । तत्त्वत्रयविषयकयथार्थज्ञानविशिष्टैरुपासकैः श्रीमद्भगवद्भक्तैः पुरुषविशेषैः निष्कामभावनया सह श्रीमद्भगवत्प्रीत्यर्थमेव यथाधिकारं विहितानि तानि तानि कर्माणि अनुष्ठेयानि भवन्ति ।

मुक्तैर्भगवदाद्यवतारैश्च लोकसंग्रहार्थमेव तानि तानि कर्माण्यनुष्ठेयानि भवन्ति न तु निषिद्धानि लशुनकलञ्जभक्षणादिरूपाणि कर्माणीति सर्वशास्त्राणां तात्पर्यम् ।

तत्र कर्मज्ञानोपासनादिप्रतिपादकानां शास्त्राणां मध्ये वेदस्यैव मुख्यत्वं पूर्वोक्तयुक्तेः । तत्रापि सर्ववेदापेक्षया गायत्रीमन्त्रस्यैव मुख्यत्वम्,

ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
"त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ।" इति मनुक्तेः ।

अ० २ श्लो० ८

तथैव "सचन्त यदुषसः" इत्यादिऋग्वेदीयादिमन्त्राणामपि वेदे प्राधान्यमेव तेषां मन्त्राणां परात्परतरश्रीरामचरितस्यापि प्रतिपादकत्वात् ।

इत्यादि विषयमभिलक्ष्यीकृत्यैव विरक्तशिरोमणिना वैष्णवकुलभूषणेन भूमिभूषण (भूमिहार) ब्राह्मणवंशावतंसेन तपस्त्यागादिविविधविधशुभगुणगणविशिष्टेन मनीषिप्रवरेण दासोपनामकेन श्रीपरमहंसबलभद्रेण "ब्रह्ममुखपरिचयः" "मन्त्रतत्त्वचिन्तामणिः" चेति ग्रन्थरत्नद्वयं लिखितं, तत्र चानेकशास्त्रीययुक्तिभिः प्राचीनसायणादिभाष्यपर्यालोचनपुरःसरं स्वरसंचारप्रकारेण सत्संस्कृतभाषया व्याख्यानमपि तेनैव कृतम् । परञ्च तद्ग्रन्थरत्नद्वयमधुनाऽप्रकाशितमपि झटित्येव कतिपयैर्धार्मिकप्रवरैः तस्य रत्नद्वयस्य प्रकाशनमिष्यत एव ।

पूर्वमपि अनेनैव महात्मना श्रीवैष्णवमताब्जभास्करः,, श्रीरामार्चनपद्धतिः" चेत्याद्यनेकसद्ग्रन्थाः पूर्वाचार्य श्रीमद्रामानन्दाचार्यनिर्मिताः संस्कृतटीकया हिन्दीटीकया च सम्पादिताः प्रकाशिताश्चासन् ।

तैश्च प्रकाशितैःसटीकसद्ग्रन्थरत्नैर्जनताजनार्दनस्य महत्युपकृतिरासीदिति सर्वेषामेव धार्मिकाणां विदुषां सुविदितमेव । अस्य च महात्मनो जन्म वि० सं० विंश-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तितमशताब्दीयद्वितीयचरणेऽभूत् । तच्च जन्म न केवलं मिथिलाभूमिमेवालञ्चका- रापितु निखिलमानवसमाजमपि । स महात्मा सदाचारादिसम्पन्नपवित्रभूमिहार- ब्राह्मणगृहे सम्भूय समये उपनयनादिसंस्कारैः संस्कृतः सन् श्री अयोध्यावासिभिः पय आहारिभिर्महात्मभिः संस्थापिते सरयूतटनिकटवर्तिनि छपरानगरसमीपस्थे गोदाम (गोदना) सिमरियानामके श्रीरामानन्दीयवैष्णवानां पूज्यतमे श्रीराममन्दिरेऽधिप- तिपदारूढस्य भगवद्भागवतसेवापरायणस्य महात्मनः श्रीस्वामिगङ्गादासमहाराजस्य शिष्यत्वमङ्गीकृत्य तद्दत्तान् वैदिकान् श्रीमन्त्रराजादिकान् सार्थान् मन्त्रान् साङ्गोपा- ङ्गमधीत्य गुरुमुखादेव जपध्यानादिविधिं च विज्ञाय "गुरोराज्ञा गरीयसी" इति सिद्धान्तानुसारेण गुरोराज्ञां लब्ध्वा नैष्ठिकब्रह्मचर्याश्रममङ्गीकुर्वन् वीतरागिणां शान्त्युपासकानां परमैकान्तिनां श्रीरामपरायणानां वैष्णवमहात्मनामेकावासभूमिं भगवतः श्रीरामस्य लीलाभूमिं साकेताऽपरपर्यायां श्री अयोध्यां समागत्य व्याकरणादिकं शास्त्रमधीत्य समयं प्राप्य ज्ञानभक्त्य धारभूतां श्रीकाशीमागतः सन् "मातृदेवो भव" इति श्रुतिमन्वर्थां कर्तुं मातुः सेवया सहैव भगवद्भागवतादिसेवायामपि कायेन वचसा मनसा च प्रवृत्त आसीत् । शनैः शनैः प्रख्यातत्वेन तद्दैनिकचर्यादिकं च श्रुत्वा मिथिलाधिपस्य श्रीमतः श्रीलक्ष्मीश्वरसिंहशर्मणो मैथिलब्राह्मणवंशावतंसस्य श्रीमहाराजस्य काशीवासं कुर्वाणाभिर्ज्येष्ठधर्मपत्न्यादिभिः प्रार्थितः सन् ज्ञानभक्ति- प्रतिपादकानां विविधविधपुराणोपनिषदादिसद्ग्रन्थानां प्रवचनार्थं व्यासासने संस्था- पितोऽभूत् । बहुकालानन्तरमस्यामेव सर्वविद्याभूमौ काश्याम् समाजसेवार्थमेकं नवं भव्यंकूपादिविशिष्टम् "ब्रह्मर्षिसंस्कृतच्छात्रावास" नामधेयकं भवनमपि संस्थाप्य श्वासरुजातिपीडितः स परमहंसमहोदयः श्रीबाबूपार्वतीप्रसादसिंहशर्ममहोदयैः तत्प्रे- रितैः भूमिहारब्राह्मणकुलभूषणैः श्रीमान् महाराजविभूतिनारायणसिंहशर्म्मभिस्त- दनुगामिभिरन्यैश्च विद्वद्वरैः सादरमभ्यर्थितः परमहंसः श्रीस्वामिबलभद्रदासो रामनगरे राजकीयभवन एव पञ्चवर्षपर्यन्तं समयं सानन्दं समाप्य पुनरन्तसमये २००६ वि० सं० भगवतः श्रीविश्वेशस्यानुकम्पयाऽच श्रीकाश्यामेव समागतः श्रीहरिश्चन्द्रघट्टे स अस्माकं मानवानां माननीयः श्रीबलभद्रः मायिकेन बन्धनहेतुभूतेन पाञ्चभौतिक- नश्वरकलेवरेण साकं नित्यं यशः शरीरमिहः लीलाभूमौ परित्यज्य साकेताख्ये नित्य- धाम्नि नित्यं स्थितं सच्चिदानन्दघनं ससीतं श्रीरामभद्रं जगामेत्यलमतिविस्तरेण ।

श्री रामलक्ष्मणाचार्यः
व्याकरणन्यायमीमांसाद्याचार्यः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीः

श्रीसीतारामौ विजयेतेतराम्

श्रीमते रामानुजाय नमः श्रीमते रामानन्दाय नमः

अथ ब्रह्म-मुख-परिचयः ।

जयत्याश्रितसंत्रास–ध्वान्त–विध्वंसनोदयः ।
प्रभावान् सीतया देव्या परमव्योमभास्करः ॥ १ ॥
तं नत्वा सच्चिदानन्दं रामं सीतासमन्वितम् ।
कुर्वे ब्रह्ममुखव्याख्यां बलभद्रः स्वतुष्टये ॥ २ ॥

अथास्मिन् लोके प्रसिद्धमेवैतद् यत्खलु यस्य कस्यचिदपि पुरुषस्य यदा यस्य कस्यचिद् व्यक्ताव्यक्तपदार्थस्य परिचय ईहोदेति तदा स तत्परिचायकजनसन्निधौ गत्वा तं प्रार्थयतेः—'अमुकं वस्तु तत्रभवान् परिचायतु' इति । तदा स तत्परिचायं कारयति । तस्मिन्नेव समये प्रथमक्षणे परिचीयमानस्य सर्वाङ्गश्रेष्ठत्वेन मुखमेवावलोकयति स पश्चाच्चान्यान्यङ्गानि । ततः परिचीयमानः पूर्णतया परिचितो भवति, इति नियमः ।

एवं ब्रह्मजिज्ञासायां सत्यां जिज्ञासुर्ब्रह्मविदाचार्य्यसन्निधिं गत्वा प्रार्थयते मया (माम्) ब्रह्मपरिचयं कारयतु । तदा ब्रह्मविदाचार्य्यो ब्रह्मावबोधयोग्यतासम्पादनार्हसंस्कारं विधाय प्रथमं ब्रह्ममुखमेव परिचाययति । अत्र किं ब्रह्म, किञ्च तन्मुखम् इति जिज्ञासायां सत्यां निम्नलिखितमनूक्तश्लोकमनुसंधापयति आचार्यः—

ओङ्कारपूर्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव सावित्री विज्ञेयं ब्रह्मणो मुखम् ॥ ८१ ॥
(मनु० अ० २ श्लो० ८)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अनेनोद्धृतस्वरूपः—

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥ इति मन्त्रः ऋग् यजुः सामसु विराजते ।

"सर्वे वेदा यत्पदमामनन्ति" "वेदैश्च सर्वैरहमेव वेद्यः" "वेदवेद्ये परे पुंसि जाते दशरथात्मजे"। "वेदः प्राचेत्सादासीत् साक्षाद् रामायणात्मना" इत्यादि श्रुतिस्मृतिभिः एषां वेदानां सूक्ष्मचिदचिद्विशिष्ट-स्थूलचिदचिद्विशिष्टकारण-कार्यब्रह्मणि प्रतिपादकत्वेन पर्य्यवसानात् ब्रह्मत्वम् । अस्य ब्रह्मणो निखिल-मन्त्रात्मकशरीरस्य, ऋग्वेदस्य यजुर्वेदस्य सामवेदस्य चानेकेषु मन्त्रेषु चायं मन्त्रः सर्वाङ्गश्रेष्ठतया मुखमिव मुखम्-मुखवत् श्रेष्ठाङ्गं विज्ञेयमिति मनूक्तवचनस्य तात्पर्य्यम् । अतएव द्विजातीनां वेदाध्ययनयोग्यता-सम्पादनार्हसंस्कारविशेषं सम्पाद्योपदिशतीमं मन्त्रमाचार्य्यः । अस्य मन्त्रस्यार्थानुसन्धानपूर्वकाभ्यासादेवान्तःकरणसंशोधनपूर्वकः कार्य-कारणात्मकब्रह्मबोधः स्वयमेव संशोधितान्तःकरणे जिज्ञासूनामुदेतीति भावः । तथाचोक्तं भगवता:—

"तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति" इति

अस्य "पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना ।
आक्षेपस्य समाधानं व्याख्यानं पञ्चलक्षणम् ॥"

इत्यभियुक्तोक्तरीत्या पदच्छेदः प्राचीननवीनलिखितमुद्रितपुस्तके-ष्वित्थं दृश्यते । तथाहि:—

ॐ भूः, भुवः, स्वः, इति ॐकारपूर्विकास्तिस्रो महाव्याहृतयः । तत् सवितुः, वरेण्यम्, भर्गो, देवस्य, धीमहि, धियो, यो, नः प्रचोदयात्, इति त्रिपदा सावित्री, इति ।

अस्य व्याख्यानं श्रीसायणाचार्य्यप्रभृतिभिर्यत् कृतं तदधो वर्त्तते:—

अथ सायणव्याख्या

ऋषिर्विश्वामित्रः । छन्दो गायत्री देवता सविता ।
अथ तत्सवितुर्वरेण्यमिति तृतीयसूक्तरूपा सैषा ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यः सविता देवः नः अस्माकम् धियः कर्माणि धर्मादिविषया वा बुद्धीः प्रचोदयात् प्रेरयेत् । तत् तस्य देवस्य द्योतमानस्य सवितुः सर्वान्तर्यामितया प्रेरकस्य जगत्स्रष्टुः परमेश्वरस्य वरेण्यम्, सत्स्वरूपतया ज्ञेयतया च भजनीयम्, भर्गः, अविद्यातत्कार्ययोर्भर्जनात् भर्गः स्वयं ज्योतिः परब्रह्मात्मकं तेजः, धीमहि वयं ध्यायामः । यद् भर्गः, धियः प्रचोदयति तद् ध्यायाम इति समन्वयः । यद्वा यः सविता सूर्यः, धियः कर्माणि प्रचोदयति प्रेरयति तस्य सवितुः सर्वस्य प्रसवितुर्देवस्य द्योतमानस्य सूर्यस्य तत् सर्वैर्दर्शनीयतया प्रसिद्धं वरेण्यम् सर्वैर्भजनीयं भर्गः पापानां तापकं तेजोमण्डलम् धीमहि मनसा धारयेम । यद्वा भर्गशब्देनान्नमभिधीयते । यः सविता देवः, धियः प्रचोदयति तस्य देवस्य प्रसादात् तद् भर्गः अन्नादिलक्षणं फलं धीमहि धारयामः तस्याधारभूता भवेमेत्यर्थः । भर्गशब्दस्यान्नपरत्वे धीशब्दस्य कर्मपरत्वे चाथर्वणम्-"वेदाश्छन्दांसि-सवितुर्वरेण्यम्-भर्गो देवस्य कवयोऽन्नमाहुः कर्माणि धियस्तदु ते प्रब्रवीमीति प्रचोदयात् सविता याभिरेतीति (गो० ब्रा० १,३२)" भर्गः, भ्रस्ज पाके (तु० ३०) असुन् "भ्रस्जो रोपधयो रमन्यतरस्याम् (६।४।४०) रोपधयोर्लोपो रमागमश्च न्यङ्क्वादिपाठात् कुत्वम् (७।३, ५२) धीमहि ध्यायतेर्लिङि "बहुलं छन्दसि" (२।४।७६।) इति सम्प्रसारणम् व्यत्ययेनात्मनेपदम् । यद्वा धीङ् आधारे (दि० आ०) लिङि "बहुलं छन्दसि (२,४,७३) इति विकरणस्य लुक् । प्रचोदयात् चोदयतेर्लेटि आडागमः यद् वृत्तयोगादनिघातः । आगमस्यानुदात्तत्वे णित्स्वरः (३।४।१०) ऋग्वेदे, इत्थं सायणभाष्यम् ।

अथोवटभाष्यम्

तत्सवितुः सावित्री गायत्री । तदिति षष्ठ्या विपरिणम्यते । तस्य सवितुः सर्वस्य प्रसवदातुः । आदित्यान्तरपुरुषस्य देवस्य हिरण्यगर्भोपाध्यवच्छिन्नस्य वा विज्ञानानन्दस्वभावस्य वा ब्रह्मणः । वरेण्यम् वरणीयम् । भर्गःभर्गशब्दो वीर्य्यवचनः ।"वरुणाद्ध वा अभिषिषिचानाद्भर्गोऽपचक्राम वीर्य्यं वै भर्गः" इति श्रुतिः । तेन हि पापं भृज्जति दहति । "भृजी भर्जने" । अथवा भर्गस्तेजोवचनः । यद्वा मण्डलं पुरुषो रश्मय

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्येतत्त्रितयमभिप्रेयते। देवस्य दानादिगुणयुक्तस्य। धीमहि "ध्यै चिन्तायाम्" अस्य छान्दसं सम्प्रसारणम्। ध्यायामः चिन्तयामः। निदिध्यासं तद्विषयं कुर्म इति यावत्। धियो यो नः। धीशब्दो बुद्धिवचनः कर्मवचनो वा वाग्वचनश्च। बुद्धीः कर्माणि वा वाचो वा। यः सविता नोऽस्माकम्। प्रचोदयात्। "चुद संचोदने"। प्रकर्षेण चोदयति प्रेरयति तस्य सवितुः सम्बन्धि वीर्य्यं तेजो वा ध्यायाम इति सम्बन्धः। वाक्यभेदेन वा योजना। तत्सवितुर्वरणीयम् वीर्य्यं तेजो वा देवस्य ध्यायामः। स च सवितैव भवति। लिङ्गव्यत्ययेन वा योजना। तत्सवितुर्वरणीयं भर्गो देवस्य ध्यायामो धियो यद्भर्गः—अस्माकं प्रेरयति॥ ३५ मं० अ० ३॥ इति यजुर्वेदोवटभाष्यम्।

अथ महीधरभाष्यम

विश्वामित्रदृष्टा सावित्री गायत्री जपे विनियुक्ता। तदिति षष्ठ्यर्थे। तस्य देवस्य द्योतनात्मकस्य सवितुः प्रेरकस्य अन्तर्यामिणो विज्ञानानन्दस्वभावस्य हिरण्यगर्भोपाध्यवच्छिन्नस्य वा, आदित्यान्तःपुरुषस्य वा ब्रह्मणो वरेण्यम् वरणीयम् सर्वैः प्रार्थनीयं भर्गः सर्वपापानां सर्वसंसारस्य च भर्जनसमर्थं तेज; सत्यज्ञानानन्दादि वेदान्तप्रतिपाद्यं वयं धीमहि ध्यायामः। छान्दसं सम्प्रसारणम्। यद्वा मण्डलं पुरुषो रश्मय इति त्रयं भर्गशब्दवाच्यम्। भर्गो वीर्य्यं वा। "वरुणाद्ध वा अभिषिषिचानाद्भर्गोऽपचक्राम वीर्य्यं वै भर्गः" (५।४।५।१) इतिश्रुतेः। तस्य कस्य। यः सविता नोऽस्माकं धियः, बुद्धीः कर्म्माणि वा प्रचोदयात् प्रकर्षेण चोदयति प्रेरयति सत्कर्मानुष्ठानाय। यद्वा वाक्यभेदेन योजना। सवितुर्देवस्य तद्वरेण्यं भर्गो ध्यायामः। यश्च नो बुद्धीः प्रेरयति तं च ध्यायामः। स च सवितैव। लिङ्गव्यत्ययेन योजना। सवितुर्देवस्य तद् भर्गो धीमहि। यो यद् भर्गो नो बुद्धीः प्रेरयति॥३५॥ इति यजुर्महीधरभाष्यम्:—

अथ श्रीमद्वेङ्कटनाथार्य्यविरचितस्मृतिरत्नाकराद् गायत्रीमन्त्रव्याख्योद्ध्रियते:—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्र विश्वामित्रः—

"देवस्य सवितुस्तस्य धियो यो नः प्रचोदयात् ।
भर्गो वरेण्यं तद्ब्रह्म धीमहीत्यर्थ उच्यते ॥" इति

अगस्त्यः—

"यो देवः सवितास्माकं धियो धर्मादिगोचराः
प्रेरयेत्तस्य यद्भर्गस्तद्वरेण्यमुपास्महे" ॥ इति च—

अनयोर्वचनयोर्भर्गशब्दः तेजःपरत्वेन यः शब्दश्च सवितृपरत्वेन व्याख्यातः । तथा वरदराजीये—नित्यमन्त्रव्याख्याने च तच्छब्दश्रुते-र्यच्छब्दोऽध्याहार्य्यः । सवितुः जगतः प्रसवितुः सविता वै प्रसवानामीशे—"उत्तेशिषे प्रसवस्य त्वमेकः ।"इत्यादि श्रुतेः। वरेण्यम् "वृञ् सम्भक्तौ" एण्यप्रत्ययः । सर्वेषां संभजनीयम् । भर्गस्तेजः भञ्जनाद्भर्गः। प्रकाशप्रदानेन जगतो बाह्याभ्यन्तरतमो भञ्जकत्वाद्, भर्जनाद्वा कालात्मकतया सकल-कर्म्मफलपाकहेतुत्वाद्, भरणाद्वा वृष्टिप्रदानेन भूतानां भरणहेतुत्वात् । देवस्य द्योतमानस्य धीमहि चिन्तयामः, 'ध्यै चिन्तायाम्' । देवस्य सवितु-र्वरेण्यं यद्भर्गस्तद्ध्यायामः आदित्यमण्डलान्तर्वर्त्तिनं तेजोमयं पुरुष-मनुचिन्तयामः । "य एषोऽन्तरादित्यहिरण्मयः पुरुषः, अथ य एष एतस्मिन् मण्डलेऽर्चिःपुरुषः" । इत्यादिश्रुतेः । धियो यो नः सविता अस्माकम्, धियः, हानोपादानविषयाणि ज्ञानानि प्रचोदयात् प्रचोदयति प्रवर्तयति, तत्सवितुस्तद्भर्गश्चिन्तयाम इति ।

प्रपंचसारे च:—

तदिति द्वितीयैकवचनान्तम् । अनेनाखिलवस्तुनः सृष्ट्यादिकारणम् तेजोरूपमादित्यमण्डले "अभिधेयम्, सदानन्दं परब्रह्माभिधीयते ॥

विश्वामित्रश्च:—आदित्यमण्डलासीनं रुक्माभं पुरुषं परम् ।
ध्यायन् जपेत्तदित्येता निस्कामो मुच्यते द्विजः ॥
सप्रभं सत्यमानन्दं हृदये मण्डलेऽपि च ।
ध्यायन् जपेत्तदित्येतां निष्कामो मुच्यतेऽचिरात् ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स यश्चायं पुरुषे, यश्चासावादित्ये, स एक इति। ध्यानार्थं इत्यत्र जगत्कारणभूतं परं ब्रह्म, सर्वान्तर्यामी सूर्य्यमण्डलवर्त्ती तेजोमयः पुरुष इति व्याख्यातम्। स तु पुरुषः पुण्डरीकाक्ष एव। "य एषोऽन्त-रादित्ये हिरण्मयः पुरुषो दृश्यते, हिरण्यश्मश्रुर्हिरण्यकेश आप्रण-खात्सर्व एव सुवर्णः। तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणीति।" श्रुतेः। कं जलं पिबतीति कपिः सूर्य्यः, तेन, अस्यते विकासयते इति कप्यासं रविकरविकसितमित्यर्थः। तथान्तर्यामी पुरुषो नारायण एव। "एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो देव एको नारायण" इति श्रुतेः। एवं च सति सवितृमण्डलान्तर्वर्त्तिनः पुण्डरीकाक्षस्य सकलजगदाधारं विष्णुसंज्ञं यद्भर्गः तत्तेजश्चिन्तयाम इति सिद्धम्। अत्र मैत्रावरुणीयश्रुतिः—"एतत्सवितुर्वरेण्यम्; ध्रुवमचलममृतं भर्गाख्यं विष्णुसंज्ञं सर्वाधारं धाम" इति

योगियाज्ञवल्क्यश्च:—

ईश्वरं पुरुषाख्यं च सत्यधर्म्माणमच्युतम्।
भर्गाख्यं विष्णुसंज्ञं च ध्यात्वामृतमुपाश्नुते॥

अनेन धीमहीति ध्यानविषयभूतो विष्णुरेवेतिसिद्धम्। अतएवागस्त्य-सनकस्मृतौ ध्येयो विष्णुरेवेतिनिश्चितम्॥

"आदित्यमण्डले ध्यायेत्परमात्मानमव्ययम्।
विष्णुं चतुर्भुजं रक्तपङ्कजासनमव्ययगम्।
हरिं पीताम्बरधरं शंखचक्रगदाधरम्॥
प्रसन्नवदनं रत्नकुण्डलमण्डिताननम्॥
सर्वरत्नसमायुक्तं सर्वाभरणभूषितम्।
एवं ध्यात्वा जपेन्नित्यं मन्त्रमष्टोत्तरं शतम्॥
सर्वपापविशुद्धात्मा जितक्रोधो जितेन्द्रियः।
संसारार्णवमुत्तीर्य्य परां सिद्धिमवाप्नुयात्"॥ इति

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

एवं गायत्र्या देवतात्वेन, आदित्यमण्डलान्तर्वर्त्तिनः पुरुषोत्तमस्यैव ध्येयत्वनिर्धारणात् अस्या देवतान्तरदेवतात्वाशाभित्तौ राज्ञः किरीटाशेव दुराशैव ॥

अत्र भरद्वाजः—

"अथाहमर्च्यं गायत्र्याः प्रवक्ष्यामि यथातथम् ।
द्विजोत्तमानां सद्भक्त्या जपादीनि प्रकुर्वताम् ॥

विश्वासभक्तिजननं मन्त्रार्थज्ञानमुत्तमम् ।
तस्मादर्थं विजानीयादुक्तेन जपकृद्द्विजः ॥

द्वाभ्यां विश्वासभक्तिभ्यां जपादीनां महत्तरम् ।
फलं भवेज्जपकृतामिति वेदेषु भाषितम् ॥

पदानि दश मन्त्रस्य तदादीनि यथाक्रमम् ।
पदप्रत्ययनिष्पत्तिः सुस्पष्टं क्रियतेऽत्र तु ॥"

तदिति द्वितीयैकवचनम् । अनेन, अखिलजगदुत्पत्ति-स्थिति-लयकारणभूतम्, उपनिषदि कथ्यमानं निरुपमं तेजः सूर्य्यमण्डलाभिध्येयं परब्रह्माभिधीयते । सवितुरिति षष्ठ्येकवचनम् । "षूञ् प्राणिप्रसवे" इत्यस्य धातोरेतद्रूपम्, सर्वभूतजातस्य प्रसवितुरित्यर्थः । वरेण्यम् वरणीयम्, प्रार्थनीयम्, नियमादिभिरपहतकल्मषैः सततं ध्येयम् । भर्गः "भञ्जो आमर्दने" "भ्रस्ज् भञ्जने" इत्येतयोर्धात्वोः, भजतां पापभञ्जनहेतुभूतमित्यर्थः । "भा दीप्तौ" इत्येतस्य धातोर्वा भर्गस्तेज इत्यर्थः । देवस्य वृष्टिदानादिगुणयुक्तस्य निरतिशयस्येत्यर्थः दिव्यतेजः प्रकाशत्वात् । धीमहि "ध्यै चिन्तायाम्" निगमनिरुक्तविद्यारूपेण चक्षुषा योऽसावादित्ये हिरण्मयः पुरुषोऽहमिति चिन्तयामः । धिय इति बहुवचनम् । 'य' इति छान्दसत्वाल्लिङ्गव्यत्ययः । यत् सवितुर्देवस्य वरेण्यं श्रेष्ठमस्माभिरभिध्यातम्, भर्गो भजतां पापभञ्जनहेतुभूतम्, नः अस्माकम् धियः, बुद्धीः श्रेयस्करेषु कर्म्मसु, प्रचोदयात् प्रेरयेदित्यर्थः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"एषा जप्ता तु गायत्री सर्वपापप्रणाशिनी ।
विज्ञातव्या प्रयत्नेन द्विजैः सर्वशुभेप्सुभिः ॥
जपस्यानन्तरं व्याख्या स्मर्तव्याहरहर्द्विजैः ।
स्मरणात्सर्वपापानि प्रणश्यन्ति न संशयः ॥

अत्र सवितृशब्दं निराहाहिर्बुध्नः—प्रसौति सकलां चेष्टामित्यादि ॥ लौहित्यनीलकण्ठेन च मन्त्रदीपिकायाम्:—

तच्छब्देन भर्गो विशिष्यते, भर्ग इति तेजःपदार्थकं सवितृसम्बन्धीति

"देवस्य सवितुस्तेजो वरेण्यं भर्गसंशितम् ।
ध्याये महीतिशब्दोक्तौ धीमहीत्यर्थ उच्यते ॥
यः शब्दश्च यदित्यर्थे लिङ्गव्यत्ययतो भवेत् । इति

एवं सवितृशब्दस्य जगत्कारणभूतपरमात्मपरत्वनिश्चयात्, भर्गशब्दस्य तेजोवाचित्वनिर्धारणात्, विश्वामित्रागस्त्यादिस्मृतिषु प्रपञ्चसारे मन्त्रव्याख्यानेषु च भर्गशब्दस्य बहुधार्थप्रतिपादनेऽपि रुद्रपरत्वानाघ्राणात्, इयं गायत्री परमात्मपरैवेति सिद्धम् । अन्यत्र भक्तिवादात् । किञ्च "ध्यात्वा मन्त्रार्थमेव च । अनुष्ठानं ततः कुर्यात्" इति पितामहवचनात्, "जपस्यानन्तरे व्याख्या स्मर्तव्या" इति भरद्वाजवचनाच्च । जपाद्यन्तयोर्गायत्र्यर्थोऽत्रानुसन्धेयः, मनःप्रसादहेतुत्वादतिशयसंभवाच्च ।

इति श्रीमद्वेङ्कटनाथार्यविरचितगायत्रीमन्त्रव्याख्या समाप्ता ॥

उपर्युक्तभाष्यचतुष्टयावलोकनाऽनन्तरम्, स्मृतिरत्नाकरे ध्यानप्रकरणे भरद्वाजवचनम्:—

"दिग्बन्धनं ततः कृत्वा ध्यायेद्देवीं प्रसन्नधीः ।
आयात्वित्यनुवाकेन हृदये वार्कमण्डले ॥
देवीमावाह्य गायत्रीं ततो ध्यायेद्द्विजोत्तमः ।
हैमे सिंहासने देवीं स्थितां ध्यायेद्द्विजोत्तमः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्तुत्वा च विविधैः स्तोत्रैर्देवीमुद्वासयेत् ततः ।
यो ध्यानेनार्चयेद्देवीं सर्वाभीष्टं लभेत सः । इति

इत्याद्युपर्युक्तवचनानन्तरम् ।

"आयातु वरदे देवि त्र्यक्षरे ब्रह्मवादिनि"
गायत्रीछन्दसां मातर्जपे मे सन्निधिर्भव ।। इति वचनम् ।

तत्र पूर्वोक्तवचनैर्देव्या आवाहनम्, स्तवनम्, ध्यानम्, उद्वासनं च-विहितम् । संध्यापुस्तकेषु आवाहनानन्तरम्, निम्नलिखितध्यानम् उद्वासनं चैवम्:—

"शुक्लवर्णा समुद्दिष्टा कौशेयवसना तथा ।
श्वेतैर्विलेपनैः पुष्पैरलंकारैश्च भूषिता ।।
आदित्यमण्डलान्तःस्था ब्रह्मलोकगताथवा ।
अक्षसूत्रधरा देवी पद्मासनगता शुभा ।।"

एवं ध्यायन् जपित्वा क्षमापनं कारयेत् । तन्मन्त्रश्चैवं विद्यतेः —

'यदक्षरं पदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देवि ! कश्यपप्रियवादिनि ।।"

ततश्च परमुद्वासनमन्त्र एवं विद्यतेः—

"ॐ उत्तमे (उत्तरे) शिखरे जाते भूम्यां पर्वतमूर्द्धनि ।
ब्राह्मणेभ्योऽभ्यनुज्ञाते गच्छ देवि ! यथासुखम् ।।"

इत्युपर्युक्तवाक्यैर्देव्या आवाहनम्, स्तवनम्, ध्यानम्, क्षमापनम, उद्वासनं च सिद्धम् । एतेन स्त्रीदेवताकोऽयं गायत्रीमन्त्रः प्रतिभाति । श्रीविष्णुधर्मोत्तरे मानसजपलक्षणमेवं विद्यतेः—

"धिया यदक्षरश्रेण्यां वर्णाद्वर्णं पदात्पदम् ।
मन्त्रार्थचिन्तनाभ्यासो मानसो जप उच्यते ।।"

इति वचनेन मानसजपकाले मन्त्रार्थचिन्तनं विहितम् । नहि तत्र

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

देवीध्यानबोधकं किमपि पदं विद्यते । अतो देवीध्यानबोधकवचनेन सह मन्त्रार्थचिन्तनबोधकवचनस्य भाष्यकारप्रदर्शितार्थस्य च परस्परविरोधोऽनिवार्यः प्रतिभाति ।

'श्रीपराङ्कुशदिग्विजये' स्कान्दीयवचनम्:—

"वाल्मीकिरभवद् ब्रह्मा वाणी वाक् तस्य रूपिणी ।
चकार रामचरितं पावनं चरितव्रत ? ॥
गायत्र्यास्त्रीणि चत्वारि द्वे द्वे त्रीण्यथ षट् क्रमात् ।
चत्वारि सप्तकाण्डेषु स्थापितान्यक्षराणि तु ॥

एवमुपलभ्यते ।

एतद्वचनानुगुणं स्वनामधन्यप्रसिद्धवैयाकरणश्रीनागेशविरचिततिलकनामकरामायणव्याख्यायां बालकाण्डस्य प्रथमश्लोकस्यावतरणिकायाम्:—

"अपि च गायत्र्या ब्रह्मानुसन्धानाद् ब्रह्मलोकावाप्तिवत् तत्प्रतिपाद्यस्य लीलावताररूपरामस्य विभववैभवानुसन्धानेन ब्रह्मलोकावाप्तिरुचितैव" ...."ब्रह्मांशभूत एव प्राचेतसो वाल्मीकिः स्वकृतशतकोटिरामायणसारभूतं चतुर्विंशत्यक्षरगायत्र्याख्यपरब्रह्मविद्याविलासभूतं रामायणं चतुर्विंशतिसहस्रश्लोकरूपं कुशलवाभ्यामग्राहयत् ।" एवं च प्रथमसर्गस्यान्तिमश्लोकव्याख्यायाम्:—

"अस्यां गायत्र्यर्थप्रतिपादकत्वध्वननाय गायत्र्यादिमाक्षरेणोपक्रम्य यादितिगायत्र्यन्तिमाक्षरेण समापितवान्" । इति दृश्यते ।

एवं श्रीगोविन्दराजेनापि प्रथमसर्गस्यान्तिमश्लोकव्याख्यायाम्:—

"अत्र संक्षेपे तकारेणोपक्रम्य याद्दिति समापनात् गायत्रीस्वरूपत्वमस्य गम्यते!" इति । एवं ४ सर्गे २ श्लोकव्याख्यायां चतुर्विंशतिसहस्रस्य चतुर्विंशत्यक्षराणां च विशदतमव्याख्या कृता; सा यथास्ति तथावलोक्यताम्:—

तत्रैवमवधातव्यम्, बालकाण्डे त्रिंशे सर्गेः—

"स तेन परमास्त्रेण मानवेन समाहतः ।"

इत्यतः पूर्वमेकं सहस्रम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्रिषष्ठितमेः—

"विश्वामित्रो महातेजा भूयस्तेपे महत्तपः।" इत्यतः पूर्वं द्वे सहस्रे।

अयोध्याकाण्डे चतुर्दशेः

"चतुरश्वो रथः श्रीमान् निस्त्रिंशो धनुरुत्तमम्।"

इत्यतः पूर्वं त्रीणि सहस्राणि।

चतुश्चत्वारिंशेः—

'वर्त्तते चोत्तमां वृत्तिं लक्ष्मणोऽस्मिन् सदानघ' इत्यतः पूर्वं चत्वारि सहस्राणि।

एकसप्ततितमेः—

'द्वारेण वैजयन्तेन प्राविशच्छ्रान्तवाहनः।' इत्यतः पूर्वं पञ्चसहस्राणि।

एकोनविंशतितमेः—

'उटजे राममासीनं जटामण्डलधारिणम्'

इत्यतः पूर्वं षट् सहस्राणि।

आरण्यकाण्डे द्वादशे,

'ते वयं वनमत्युग्रं प्रविष्टाः पितृशासनात्'।

इत्यतः पूर्वं सप्त सहस्राणि।

सप्तचत्वारिंशेः—

'मम भर्त्ता महातेजा वयसा पञ्चविंशकः'।

इत्यतः पूर्वं चाष्टौ सहस्राणि।

किष्किन्धाकाण्डे चतुर्थेः—

'ततः परमसंहृष्टो हनुमान् प्लवगर्षभः'।

इत्यतः पूर्वं नव सहस्राणि।

एकत्रिंशेः—

'नरेन्द्रसूनुर्नरदेवपुत्रं रामानुजः पूर्वजमित्युवाच'।

इत्यतः पूर्वं दशसहस्राणि।

किष्किन्धाकाण्डसमाप्तावेकादश सहस्राणि।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सुन्दरकाण्डे सप्तविंशे:—१४ श्लोके

'ततस्तस्य नगस्याग्रे'

इत्यतः पूर्वं द्वादश सहस्राणि ।

षट्चत्वारिंशे:—

'नावमन्यो भवद्भिश्च हरिर्धीरपराक्रमः'

इत्यतः पूर्वं त्रयोदश सहस्राणि ।

सुन्दरकाण्डसमाप्तौ चतुर्दश सहस्राणि ।

युद्धकाण्डे, अष्टाविंशे: —

'रक्षोगणपरिक्षिप्तो राजा ह्येष विभीषणः' ।

इत्यतः प्राक् पञ्चदश सहस्राणि ।

पञ्चाशे:—

'प्रदर्शनं च बुद्धिश्च स्मृतिश्च द्विगुणं तयोः'

इत्यतः प्राक् षोडश सहस्राणि ।

उत्तरभागारम्भे:—

'कुम्भकर्णं हतं दृष्ट्वा राघवेण महात्मना ।'

इत्यतः प्राक् सप्तदश सहस्राणि ।

अशीतीत्यन्तेन अष्टादश सहस्राणि ।

द्वादशशततमे:—

'मरणान्तानि वैराणि ।'

इत्यतः प्राक् एकोनविंशतिसहस्राणि ।

युद्धकाण्डसमाप्तौ विंशतिसहस्राणि ।

उत्तरकाण्डे द्वाविंशे:—

'ततः प्राचोदयत्सूतस्तान् हयान् रुचिरप्रभान्'

इत्यतः पूर्वम् एकविंशतिसहस्राणि ।

चत्वारिंशत्समाप्त्या द्वाविंशत्सहस्राणि । षट्सप्ततितमे: —

'ब्राह्मणस्य च धर्म्मेण त्वया वै रक्षितः सुतः'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यतः पूर्वं त्रयोविंशतिसहस्राणि ।
ततः प्रबन्धसमाप्त्या चतुर्विंशतिसहस्राणीत्याहुः ॥ २ ॥
एवं बालकाण्डस्य प्रथमश्लोकव्याख्यायाम् चतुर्विंशत्यक्षरविवेकमुक्तवान्; तद् यथाः—

अस्य श्रीरामायणस्य गायत्र्यक्षरसङ्ख्यानुसारेण चतुर्विंशतिसहस्रग्रन्थसङ्ख्यया प्रवृत्तत्वात् प्रथमसहस्रोपक्रमे 'तकारः' प्रयोक्तव्य इति ।

एवं बालकाण्डस्य ३० तमे सर्गे, १७ श्लोकसङ्ख्यायाम् अत्र द्वितीयाक्षरम्, "स" इति ॥

बालकाण्डस्य त्रिषष्टितमे सर्गः—(तृतीयश्लोकस्योत्तार्धे)
'विश्वामित्रो महातेजा भूयस्तेपे महत्तपः' इत्यत्र 'वि' इति गायत्रीतृतीयाक्षरम् । अयोध्याकाण्डस्य १४ सर्गे ३६ श्लोकव्याख्यायाम्ः—

'चतुरश्वो रथः श्रीमान् निस्त्रिंशो धनुरुत्तमम्'

इत्यत्र 'तु' इति गायत्र्याश्चतुर्थाक्षरम् ।

अयोध्याकाण्डस्य ४४ सर्गे ५ श्लोकव्याख्यायाम्ः—
'वर्त्तते' इत्यादिना । अत्र 'व' इति गायत्र्याः पञ्चमाक्षरम् । अयो० का० १७ सर्गे ३३ श्लो० व्याख्यायाम्ः—
"द्वारेण नगरपश्चिमद्वारेण अत्र 'र' इति षष्ठं गायत्र्यक्षरम्"
अयो० का० ६६ सर्गे पञ्चविंशतिश्लोके । अस्मिन् श्लोके उत्तरार्धे "जटामण्डलधारिणम्" इत्यत्र णकारो गायत्र्याः सप्तमाक्षरम् षट्सहस्रश्लोका गताः ॥ २५ ॥

अरण्यकाण्डे १२ सर्गे ४ र्थश्लो० व्याख्यायाम्ः—
"ते वयमित्यस्मिन् श्लोके 'यम्' इति गायत्र्या अष्टमाक्षरं । सप्तसहस्रसंख्यकाः श्लोका गताः" ।

अरण्यका० सप्तचत्वारिंशे सर्गे १० श्लो० व्याख्यायाम्—
अस्मिन् श्लोके मम भर्त्तेत्यत्र भकारो गायत्र्या नवमाक्षरम् । अष्टसहस्रश्लोका गताः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"किष्किन्धाकाण्डचतुर्थसर्गे ३ श्लोकव्याख्यायाम् ।

अस्मिन् श्लोके प्लवगर्षभ इत्यत्र 'ग' कारो गायत्र्या दशमाक्षरम् । नवसहस्रश्लोका गताः । किष्किन्धाकाण्ड ३१ सर्गे १ श्लोकव्याख्यायाम् । "अस्मिन् श्लोके" "नरदेवपुत्रम्" इत्यत्र 'देकारो' गायत्र्या एकादशाक्षरम् । दशसहस्रश्लोका गताः ।

सुन्दरकाण्डस्य १ सर्गे १ श्लोकव्याख्यायाम्:—

"अत्रैकादशसहस्रश्लोका गताः। द्वादशसहस्रस्यादिमोऽयं श्लोकः । अत्र गायत्र्या द्वादशाक्षरं प्रयुक्तं तदवलोकनीयम् विद्वद्भि ॥१॥"❀

सु० का० २७ सर्गे १४ श्लो० व्याख्यायाम्:—

"अत्र द्वादशसहस्रश्लोका गताः । त्रयोदशसहस्रादिमोऽयं श्लोकः । गायत्र्यास्त्रयोदशमक्षरमत्र बोध्यम् ॥ १४ ॥" "स्य" इति

सु० का० ४६ सर्गे १० श्लो० व्याख्यायाम्:—

"अत्र त्रयोदशसहस्रश्लोका गताः । अयं चतुर्दशसहस्रस्यादिः । 'धी' तिगायत्र्याश्चतुर्दशाक्षरम्" ।

युद्धकाण्डस्य प्रथमसर्गे १ श्लोकव्याख्यायाम्: —

"अत्र गायत्र्यक्षरं मकारः" (१५)

यु० का० २८ सर्गे २६ श्लो० व्याख्यायाम्:—

"अत्र 'ही' तिगायत्र्याः षोडशाक्षरम्" ॥ २६॥

यु० का० ५० सर्गे ४० श्लो० व्याख्यायाम्:—

"अत्र 'धि' इति गायत्र्याः सप्तदशाक्षरम् । षोडशसहस्रश्लोका गताः ॥ ४० ॥

यु० का० ६८ सर्गे १ श्लोकव्याख्यायाम्:—

" अत्र रावणायेत्यत्र 'यकारो' गायत्र्या अष्टादशाक्षरम् । सप्तदशसहस्रश्लोका गताः ।"

❀ नोट—अत्र भूषणव्याख्याकारेण स्वव्याख्यायां यथानिर्दिष्टं तथैवोद्धृतं परञ्च-इतः पूर्वं सर्वत्र गायत्र्यक्षराणां संख्यापूर्वकस्वरूपं प्रदर्शितं तद्रीत्यास्मिन् श्लोके 'व' इति द्वादशाक्षरम् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यु० ८१ सर्गे प्रथम श्लो० व्याख्यायाम्:—

"अत्र तृतीयाक्षरभूतो 'यकारो' गायत्र्या एकोनविंशतितमाक्षरम्। अष्टादशसहस्रश्लोका गताः"।

यु० का० ११२ सर्गे २५ श्लो० व्याख्यायाम्:—

"अत्र श्लोके 'नः' इति पदम् गायत्र्यक्षरम्" (२०)।

(अत्र श्रीरामाभिरामे १०६ सर्गे समाप्तिः। रामायणशिरोमणौ १११ सर्गे समाप्तिः। भूषणे ११२ सर्गे समाप्तिः। इति विवेक्तव्यं विद्वद्भिः।

उत्तरकाण्डस्य प्रथमसर्गे १ श्लोकव्याख्यायाम्:—

"अत्र 'प्र' इति गायत्र्या एकविंशाक्षरम्"।

उत्तर० का० २२ सर्गे ८ श्लो० व्याख्यायाम्: —

"ततः प्रचोदयत्सूतस्तान् हयान् रुचिरप्रभान्" इत्यत्र 'चो' इति गायत्र्यक्षरम्" ॥८॥ (इदं द्वाविंशतितमाक्षरम्)

उत्तर का० ४१ सर्गे १ श्लोकव्याख्यायाम्: —

"अत्र 'प्रमुमोद' इति 'दकारो' गायत्र्यक्षरम्" त्रयोविंशमित्याहुः।

उत्तर का ७६ सर्गे २७ श्लो० व्याख्यायाम्: —

"अत्र त्वयेत्यत्र 'या' इति गायत्र्यक्षरं चतुर्विंशमित्याहुः।"

तेन गायत्रीविवरणं रामायणमिति सूचितम्, आचार्य्येण ऋषिणा च ॥

अतो धार्मिकप्रौढमण्डलीषु चेयं चर्चा जीवति जागर्ति च। अतश्चैव चतुर्विंशतिसहस्रश्लोकात्मकश्रीरामायणं चतुर्विंशत्यक्षरात्मकगायत्रीमन्त्रस्य प्रपञ्चस्वरूपमिति सिद्धम्।

परञ्च श्रीमन्महर्षिवाल्मीकिना श्रीरामायणे श्रीसीतारामौ ध्येयत्वेनोपपादितौ, किन्तु तयोर्गायत्रीमन्त्रे किमपि लिङ्गं न दृश्यते। न चास्य मन्त्रस्य व्याख्यातृभिस्तद्ध्येयत्वस्य स्वस्वव्याख्यायाम् चर्चापि कृता, अतः परस्परं विरोधः प्रतिभाति।

एवञ्चाखिलवेदमन्त्रेषूदात्तादिस्वराणां चिन्हानि, अनादिकालतो गुरुपरम्परया समागतानि। ते च स्वरा अनेकविधाः सन्ति। क्वचित्प्र-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृतिस्वरः, क्वचित्प्रत्ययस्वरः, क्वचित्समासस्वरः। समासानामपि बहुविधत्वात् क्वचित्पुरुषस्वरः, क्वचिद् बहुव्रीहिस्वरः, इत्याद्यनेकभेद-भिन्ना अनेके समासस्वराः, एवं सुप्, तिङ्, तद्धित, कृत्, कृत्यप्रत्यय, स्त्रीप्रत्ययानां पित्, ङित्, णित्, नित्, चिदादिभेदादनेकविधा भिन्ना भिन्नाः प्रत्ययस्वराः मन्त्रेषु राजन्ते। तथा धातुस्वरा अपि। तेषां स्वराणां मन्त्रेषु सञ्चारे कृते प्रकृतिप्रत्ययविभागबोधकोदात्तादिस्वरविशिष्टानि मन्त्रगतानि सर्वाणि पदानि पृथक् २ स्वस्वार्थान् ग्राहयन्ति। ततः परं मिलित्वा शाब्दबोधं च जनयन्तीति वेदार्थविदाम्मतं प्रसिद्धं विद्वद्गोष्ठीषु। नहि कश्चित् केषांचिदपि मन्त्रगतपदानां विग्रहान्तराणि कृत्वार्थान्तराणि कर्त्तुं शक्नोति।

मन्त्रगतपदानां प्रकृतिप्रत्ययसमासादिस्वरकीलितत्वात् । यदि तु केनचित्साहसिकेन स्वरविरुद्धविग्रहं विधायार्थान्तरेषु स्वरविरुद्धार्थः क्रियेत तदा कुपिताः त एव मन्त्रा अनर्थबाहुल्यं तस्मै प्रयच्छन्तीति प्रसिद्धं महाभाष्ये "यथेन्द्रशत्रुः स्वरतोऽपराधात्" स वाग्वज्रो यजमानं हिनस्तीत्यादि" अत एवास्मिन् गायत्रीमन्त्रे यथावस्थितं स्वराणां संचारे कृते "वरेण्यम्" विहायान्येषु सर्वेषु पदेषु स्वरशास्त्रेण यथावस्थितस्वराः सञ्चारिता अभूवन्। परन्तु "वरेण्यम्" इत्यत्र रेफोत्तरस्य एकारस्य प्राचीनरीत्या लिखितमपि सिध्यति, अधुना। यतः वृञ्वरणे स्वादौ, वृञ् आवरणे चुरादौ पठिताभ्यामाभ्याम् "वृञ एण्यः" (प्र० अ० ३ पा० ३७८ सू०) इत्युणादिसूत्रेण उभाभ्याम् 'एण्य' प्रत्यये कृते उभयो रपरकगुणे च कृते "वरेण्यः" श्रेष्ठार्थक इति सिद्धम्। अत्र "धातोः" (६।१।१६२) इत्यनेन वकारोत्तराकारस्योदात्तत्वम् "आद्युदात्तश्च" (३।१।३) इत्यनेन एण्यप्रत्ययस्याद्यैकारस्य उदात्तत्वम्। "अनुदात्तं पदमेकवर्जम्" (६।१।१५८) इत्यनेन एण्यप्रत्ययस्यान्ताकारस्यानुदात्तत्वम् च सिद्धम्। एवं साधिते अस्य स्वरूपमेवं भवति "वरेण्यम्" इति। न च रेफोत्तरैकारस्य स्वरितत्वम् (वरेण्यम्) इति रूपम् सिध्यति। गायत्रीमन्त्रे अनादिगुरुपरम्पराभिर्दृश्यमानरेफोत्तरस्वरितैकारस्य गतिरस्ति चिन्तनीया? कृतायां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चिन्तायां च यथा साधनप्रक्रिया बुद्धौ समागता अस्ति तथाध उल्लिख्यते:—

"वरेण्यम्"इत्यत्र व, र, इ, एयम् इति पदच्छेदे कृते चत्वारि पदानि भवन्ति। तथा च तत्। सवितुः। व, र, इ। एयम्। भर्गः देवस्य। धीमहि धियः। यः। नः। प्रचोदयात् एवं गायत्रीमन्त्रस्य पदच्छेदानन्तरम् "पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना" इत्याद्यभियुक्तोक्तरीत्या तस्य पदार्थोक्तिर्विधीयते:—

१—तत् इति। "यत्तद् यतस्ततो हेतौ" इत्यमरः।

"ॐ तत्सदिति निर्देशो ब्राह्मणस्त्रिविधः स्मृतः" ॥ २१ ॥
"तदित्यनभिसन्धाय फलं यज्ञतपःक्रिया।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकांक्षिभिः" ॥ २५ ॥
(गी० अ० १७)

"स वः कः किं यत्तत्पदमनुत्तमम्" "तत्त्वमसि" इत्यादिश्रुतिसिद्धभगवन्नामोपबृंहणभूतसहस्रनामाध्याये (२५४ श्लो० ५३) महाभारतेऽनुशासनपर्वण्यपि तच्छब्दो हि ब्रह्मवाची प्रसिद्धः। अत्र तदिति सर्वनाम्ना लोकवेदादिसर्वप्रसिद्धं परमात्मानं निर्दिशति ऋग्वेदः यजुर्वेदः सामवेदश्चेति

२—सवितुः-"भानुर्हंसः सहस्रांशुस्तपनः सविता रविः" इत्यमरः (प्र० का० ३ दिग्वर्ग)

"सविता ॥ २० ॥"इति निघण्टोः पञ्चमाध्याये चतुर्थविभागे २० तमं पदं सवितृ- पदस्य व्याख्या च निरुक्तदैवतकाण्डस्य १० अध्याये ३१ खण्डे एवं लिखितास्ति:—

"सविता सर्वस्य प्रसविता ॥ ३ ॥ ३१ ॥ तस्यैषा भवति"
"सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत्
अश्वमिवाधुक्षद् धुनिमन्तरिक्षमतूर्त्ते बद्धं सविता समुद्रम्"

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"सविता यन्त्रैः पृथिवीमरम्णादनारम्भणेऽन्तरिक्षे सविता द्यामदृंहद् अश्वमिवाधुक्षद् धुनिमन्तरिक्षे मेघं बद्धमतूर्त्तौ बद्धमतूर्णं इति वा त्वरमाण इति वा, सविता समुदितारमिति ॥ १ ॥

अस्य निरुक्तस्य व्याख्या श्रीदुर्गाचार्य्येणैवमकारि "सविता यन्त्रैः पृथिवीमरम्णा० (ऋ० सं० ८,८,७,१) इति अर्चन्नामाङ्गिरसो हैरण्य-स्तूप ऋषिः, उत्तरायाश्च "सविता" मध्यमः, सर्वबलेशानः। किम् ? इति–"यन्त्रैः पृथिवीम् अरम्णात्" यावत्किंचित् यन्त्र्यते तत्सर्वं बलेनैव, यन्त्रिता चेयं पृथिवी निश्चला, न चान्य इन्द्रात् बलवान् यन्त्रयितास्ति, तस्मात्-इन्द्र एवेमां संयच्छन् स्थिरामकरोत्। "रम्णातिः संयमनकर्म्मा" इत्युक्तम् अथवा—वर्षेणोपकारेण पृथिवीलोकनिवासिनो धारयति, तदस्याः संयमनम्। किमेतावदेव ? न—इत्युच्यते "अस्कम्भने सविता द्यामदृंहत्" एवमप्येतस्मिन्-अस्कम्भने "अनारम्भणे" अमूर्त्तेऽन्तरिक्षे, यत्र पर्णमपि नालमवस्थानाय तत्रैवमतिगुर्वीं सौपर्णीं द्यां सविता अदृंहत् स्थिरामकरोत्, आभूतसंप्लवात्। को हि नाम मध्यमात् सवितुरन्य एतदतिदुष्करं कुर्यात् ? अपि च "अश्वम् इव अधुक्षत्" यथा अश्वबन्धः अश्वं धुनुयात्, उपावृत्तम् अनायासेन रजः तस्मादपनेष्यन्। एवं "धुनिं समुद्रम्" उदकवन्धितारम् "मेघम्" "अधुक्षत्" "सविता" अधुनोत् अकम्पयत् उदक् प्रक्षरणाय। क्व ! "बद्धम् अतूर्त्तौ" एतस्मिन्न-न्तरिक्षे अहिंसिते अत्वरमाणे वा, सर्वगतत्वादाकाशे, गमनायोग्ये वा। वाय्वात्मनैव विष्टभ्य निश्चेष्टम् बद्धमिवाधुक्षत् यः सविता, सोऽस्माक-मिदं नाम करोत्-इति। समुदिता = समुद्रः = मेघः ॥ १० ॥ ३२ ॥ १ ॥

अथास्माकं बुद्धौ उपर्युक्तश्रुतिस्मृत्योरर्थौ यथा प्रतिभाति तथा विविच्यतेः—

"सविता = सर्वस्य प्रसविता" इति महर्षियास्केन सवितृपदार्थः सर्वस्य प्रसवितेति निर्दिष्टः। अस्यायमभिप्रायः—

महाप्रलयदशायां स्वस्वसंचितक्रियमाणकर्मवासनासंस्कृतान् चतुर-शीतिलक्षयोन्यात्मकतया चतुरशीतिलक्षभेदाधिकरणाण्डजपिण्डजोष्म-जस्थावरजड़चेतनात्मकभूतवर्गान् स्वस्मिन् प्रलीनान् सृष्टिकाले तत्तद्वास-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नानुरूपकरणकलेवरप्रदानपूर्वककार्यरूपेण प्रादुर्भूतये तथा प्रादुर्भूतानपि तत्तत्प्रारब्धभोगानुकूलशुभाशुभकर्मसम्पादनार्थं सर्वेषामन्तर्यामित्वेन प्रसुवति=प्रेरयतीति प्रसविता "षू प्रेरणे" इति स्मरणात्। अथवा प्रसूयते प्रसूते वा प्रसविता=जडचेतनात्मकसकलभूतस्य मातृवत् प्रसवकर्ता "षूङ् प्राणीप्रसवे" "षूङ् प्राणीगर्भविमोचने"—इति च स्मरणाद्वा।

"तत्सृष्ट्वा तदनुप्राविशत् तदनुप्रविश्य सच्च त्यच्चाभवत्" ( )
"यतोवा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्म" (तैत्तरी०)

"सूर्य्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्"

मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्।
सम्भवः सर्वभूतानां ततो भवति भारत ॥ ३ ॥
सर्वयोनिषु कौन्तेय! मूर्त्तयः सम्भवन्ति याः।
तासां ब्रह्म महद्योनिरहं वीजप्रदः पिता" ॥४॥ (गी० अ० १४)

"भूमिरापोऽनलो वायुः खं मनोबुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ॥ ४ ॥
अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्य्यते जगत् ॥ ५ ॥
एतद्योनीनि भूतानि सर्वाणीत्युपधारय।
अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा ॥६॥ (गी० अ० ७)

"सर्वस्य चाहं हृदि संन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च" (गी० अ० १५)
श्लो० १५

"ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति।" (गी०अ०१८ श्लो०६१)

इत्यादयः श्रुतिस्मृतयश्चापि प्रमाणत्वेनानुसन्धेया। "तस्यैषा भवति" इतिनिरुक्ते १० अध्याये उपर्युक्तसवितृपदार्थे—ऋचामवतारयति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अस्यायमर्थः—तस्य सवितृपदार्थस्य प्रबोधिका परिचायिका "सविता यन्त्रैः पृथिवीमित्याद्या ऋग्भवति।

अस्या ऋच "वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम्" ॥१॥

इत्यभियुक्तोक्तलक्षण-लक्षितनिरुक्तरीत्यार्थो विविच्यते:—

सविता=सर्वस्य प्रसविता सर्वं कार्यजातमुत्पाद्य सर्वस्य कार्यजातस्य वृद्ध्यर्थं लयार्थं च "एकोऽहं बहु स्याम" इति संकल्पेन प्रेरयिता। "यन्त्रैः" सूर्य्यादिग्रहैः, अथवा संकल्पात्मकयन्त्रैः। "पृथ्वीम्" प्रसिद्धवस्तुरूपाम् "अरम्णात्" "अरम्णात्" इत्यस्य पर्यायः आरभत इति वेदितव्यः। "द्वौ चापरौ वर्णविकारनाशौ" इत्याद्युक्तनिरुक्तलक्षणरीत्या "भ्" इत्यस्य "म्" इति विकृतौ "व्यत्ययो बहुलम्"इति विकरणव्यत्यये पदव्यत्यये च 'अरम्णात्' इति रूपं जातम्। एवं च सविता=सर्वस्य प्रसविता यन्त्रैः सूर्य्यादिग्रहैः पृथ्वीमारभत=रचितुं प्रारब्धवानयमर्थो निष्पन्नः। "रभ् राभस्ये" राभस्यमुपक्रम इतिधात्वर्थस्यानुकूलत्वात्। "सविता=सर्वस्य प्रसविता" इत्यस्य सुसंगतत्वाच्च। "अरयत्" इत्यत्रापि रकारयकारयोर्मध्ये चकारस्य नाश उक्तो निरुक्तलक्षणरीत्या वेदितव्यः। तथा च "अरयत्" इत्यस्य सुष्पष्टं रूपम् 'अरचयत्' इति ज्ञातव्यम्, तस्य सुसंगतत्वात्—इति प्रथमवाक्यार्थः।

"एवमस्कम्भने सविता द्यामदृंहत्" इत्युत्तरवाक्यमपि संगच्छते। अस्यायमर्थो वेदितव्यः—स्कम्भ्नातीति स्कम्भनः, 'स्कम्भु रोधने' श्रौतोधातुः न स्कम्भनः अस्कम्भनः=अनवरोधक आकाशः। आकाशः—सर्वेषामनवरोधकतयाऽनाद्याधारभूतः तस्मिन्नाधारभूत आकाशे सविता सृष्टिस्थितिलयकर्त्ता संकल्पयन्त्रैः द्यां स्वर्गं "द्यौः स्त्री स्वर्गे च गगने दिवं क्लीवं तयोः स्मृतम्" इति मेदिन्यामुक्तत्वात् 'द्यौः' इति शब्दोऽत्र स्वर्गपरः। "अदृंहत् स्वस्मिन् सवितरि महाप्रलयदशायां सूक्ष्मतया प्रालीनां द्यां सृष्टिकाले बृहद्रूपे सिसृक्षुः सविता अवर्द्धयत्। पूर्वकल्पवत् वर्त्तमाने कल्पेऽपि सर्वेषामनावरक आकाशे महान्तं स्वर्गं स्वसंकल्पेन रचितवान् इत्यर्थः। इति द्वितीयवाक्यार्थः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यथा अश्वपालः अश्वं=अश्वाद् रजोऽधुक्षत्, रजोऽपवारकयन्त्र-विशेषैः, एवं सविता सर्वेषां सृष्टिस्थितिलयकर्त्तृ परब्रह्म स्वसंकल्परूप-यन्त्रैः अथवा स्वसंकल्परचितसूर्य्यरश्मिभिरूर्द्ध्वविक्षिप्तं समुद्रं समुद्रजलम् अतूर्त्ते=अहिंसिते नित्ये आकाशे अथवा अत्वरमाणे सम्भ्रमणादिरहिते व्यापकस्वरूपे आकाशे बद्धं सत् "धुनिम्" सुर-धुनिरूपतां गतम्=आकाशगंगारूपतां गतम् समुद्रादूर्ध्वविक्षिप्तं समुद्रं=समुद्रजलम् आन्तरिक्षम्=अन्तरिक्षादाकाशात् अधुक्षत्=अत्यांजयत्।

'दुह प्रपूरणे' प्रपूरणं त्याजनमिति तत्त्वबोधिन्याम्। प्रपूरणं पूरणा-भाव इति। ऊधःपूरणः प्रतिकूलीभाव इत्यर्थ इति बालमनोरमायाम्। उभयोः स्वारस्यं समानम्। एवमुपर्युक्तव्याख्यायामेव धात्वर्थो निर्बा-धस्तिष्ठति। यत्तु श्रीदुर्गाचार्य्यैः 'अधुक्षत्' 'सविता' अधुनोत् अकम्पयत् इति लिखितं तत् चिन्त्यम् "धुञ् कम्पने" इति धातुरूपस्य धात्वर्थस्य च बाधितत्वात्। एवं विवेचनया सवितृशब्दः शास्त्रतः श्रूयमाणस्येन्द्रियैश्च दृश्यमानस्य वस्तुमात्रस्य सृष्टिस्थितिलयकर्त्तृ परब्रह्म बोधयतीति वेदितव्यम्। अत्राश्वमान्तरिक्षमित्यत्र "अकथितं च" (पा० १।४।४१) इति कर्मत्वं विवेक्तव्यं तत्त्वज्ञैः सूक्ष्मदर्शिभिरिति तृतीयवाक्यार्थः।

३—व=यथा तथा "व वा यथातथेवैवं साम्ये" इत्यमरः। "वं प्रचेतसि जानीयादिवार्थे तु तदव्ययम्" इति मेदिन्यादिसम्मतेश्च।

४—र=रस्य रामस्य "रश्च रामेऽनिले वह्नौ भूमावपि धनेऽपि च। इन्द्रियेन्धनरोधे च भूपे रश्च प्रकीर्तितः" इत्येकाक्षरीकोषे।

५—इ ? हे श्रीः। श्रीवाचकस्य 'ई' शब्दस्य सम्बुद्धौ हे इ ? इति रूपम्। "इकार उच्यते कामो लक्ष्मीरीकार उच्यते" इत्येकाक्षरीकोषात्। अस्य साधनप्रक्रिया तु विग्रहप्रकरणे वक्ष्यामः।

६—एयम्=द्वितीयान्तएीशब्दस्य छान्दसरूपम्। अस्यार्थस्तु साधकोत्तमैः प्राप्यं रस्य रामस्य स्वरूपं ज्ञातव्यम्। अस्य साधनप्रक्रियां विग्रहप्रकरणे दर्शयिष्यामः।

७—भर्गः="हरः स्मरहरो भर्गस्त्र्यम्बकस्त्रिपुरान्तकः" इत्यमरः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"अविद्या तत्कार्ययोर्भर्जनाद्भर्गः स्वयं ज्योतिः परब्रह्मात्मकं तेजः" इति सायणः। 'भर्गः'। भर्गशब्दो वीर्य्यवचनः "वरुणाद्ध वा अभिषिषिचानाद्भर्गोऽपचक्राम वीर्य्यं वै भर्गः" इति श्रुतिः। तेन हि पापं भृज्जति दहति। 'भृजी भर्जने'। अथवा भर्गस्तेजोवचनः। यद्वा मण्डलं पुरुषो रश्मयः इत्येतत्त्रितयमभिप्रेयते। इत्युवटः। एवं भर्गशब्दं, वीर्य्यं, तेजः, मण्डलं, पुरुषः, रश्मयश्चैतेषु पञ्चसु अर्थेष्वाह आचार्यः। एवं महीधरोऽपि। श्रीमद्वेंकटनाथार्य्यैः स्मृतिरत्नाकराख्यनिबन्धस्य गायत्रीकवचप्रकरणे "भर्गस्तेजः भर्जनाद्भर्गः, प्रकाशप्रदानेन जगतो बाह्याभ्यन्तरतमो भर्जकत्वाद्भर्जनाद्वा कालात्मकतया सकलकर्मफलहेतुत्वाद् भरणाद्वा वृष्टिप्रदानेन भूतानां भरणहेतुत्वम्" इति दर्शितम्।

८—देवस्य = "देवः सुरे घने राज्ञि देवमाख्यातमिन्द्रिये।
देवी कृताभिषेकायां तेजनीस्पृक्कयोरपि"
"देवं हृषीके देवस्तु नृपतौ तोयदे सुरे" इति हैमः।

"राजा भट्टारको देवः" इत्यमरः "अमरा निर्जरा देवाः" इत्यमरश्च। देवस्य दीव्यतीति देवः सर्वभूतेषु रममाणः सवित्रभिन्नः जगत्कारणवस्तुवाचकोऽत्र देवशब्दो ज्ञातव्य इति।

९—धीमहि = ध्यायेम। "व्यत्ययो बहुलम्। ३।१।८५।" इति बाहुलकात् छन्दसि शपो लुकि धातोः सम्प्रसारणे च कृते धीमहीति "ध्यै चिन्तायाम्" इति भ्वादिगणपठितस्य ध्यैधातोः लिङि ध्यायेम इति सिद्धम्।

१०—धियः = "धीः प्रज्ञा शेमुषी मतिः" इति "धीर्धारणावती मेधा" इतिचामरः। 'धीशब्दः कर्मपरः" इति निघण्टौ अ० २।१। "धीशब्दःप्रज्ञापरः" अ० ३।६। इति च निघण्टौ। अत्र च धीशब्दः बुद्धिपरः।

११—यः = लोकवेदप्रसिद्धसर्वभूतकारणपरमात्मा।

१२—नः = अस्मान् उच्चारयितुरात्मस्वरूपान् अस्मदर्थान्।

१३—प्रचोदयात् = प्रचोदयति प्रेरयति; अण्डज-पिण्डजोष्मज-स्थावरसकलभूतजातं तद्वासनानुगुणकर्मणि नियोजयतीति तात्पर्यार्थः। इति पदार्थोक्तिः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ विग्रहः (स्वरसंचारश्च)

१—तत्=तनोति सृष्टिं विस्तारयति यः स तत्पदवाच्यः 'तनु विस्तारे' इत्यस्मात् "अन्येभ्योऽपि दृश्यते" ३।२।१७८। इत्यनेन कर्त्तरि क्विपि अनुनासिकलोपे "गमः क्वौ" इति सूत्रम् 'गमादीनामिति वक्तव्यम्' इति वार्तिकम्-तेन तुकि कृते तदिति सिद्धम्। सर्वादिगणपठितस्य छान्दसं रूपमिदम्। "सुपां सुलुक्पूर्वसवर्ण......इत्यादिना अमो लुग्विधानात्। अत्र पाणिनिमते "वृषादीनां च" ६।१।२०३। इत्याद्युदात्तः आकृतिगणत्वात्। शान्तनवाचार्य्यमते तु "फिषोऽन्त उदात्तः" १।१। "घृतादीनां च" १।२१। इत्यन्ताकार उदात्तः।

२—"सवितुः"=सुवतीति सविता तस्य सवितुरिति "षू प्रेरणे" इति तुदादिगणपठित'षू' इत्यस्मात् तृचि-इडागमे गुणेऽवादेशे च कृते 'सवितृ' इति जातम्। अत्र "चितः" ६।१।१६३। इति सूत्रम्, "चितः सप्रकृतेर्बह्वकजर्थम्" इति वार्तिकम्। इत्याभ्यां चिदन्तसवितृशब्दस्वरूपस्यान्त ऋकार उदात्तः "अनुदात्तं पदमेकवर्जम्" ६।१।१५८ इत्यवशिष्टाकारेकारौ अनुदात्तौ जातौ। ततः प्रातिपदिकसंज्ञायां सवितृशब्दात् षष्ठ्येकवचनविवक्षायां ङसि—अस्य ङकारलोपे सवितृ-अस् इति दशायां चितः इति ऋकारस्योदात्तत्वे "अनुदात्तौ सुप्पितौ इति ङसकारस्यानुदात्तत्वे" "ऋत उत्" ६।१।१११ इति ऋकाराकारयोः स्थाने रपरको दादेशस्यापि "एकादेशोदात्तेनोदात्तः" ८।२।५ इत्युदात्तत्वमेव सिद्धम्। ततश्च तच्छब्देन सह सवितृशब्दस्य संहितायाम् "उदात्तादनुदात्तस्य स्वरितः" ८।४।६६ इति 'सवितुः' सकाराकारस्य स्वरितत्वं सुस्पष्टम्।

३—"व" वेति वानमिति विग्रहे वेति सिद्धम्। अस्यार्थस्तु पदार्थोक्तौ सुस्पष्टो भविष्यति। अत्र पाणिनिमते "उञ्छादीनां च" ६।१।१६० इति अन्तोदात्तत्वम्। अथवा "वृषादीनां च" ६।१।२०३ इत्याद्युदात्तत्वम्। शान्तनवाचार्य्यमते तु "फिषोन्त उदात्तः" १।१। इति "घृतादीनां च" १।२१ इति च इत्याभ्यामन्तोदात्तत्वम्। अथवा ग्रामादीनां च २।३८। इत्याद्युदात्तत्वम्।

४—"र" नराणां समूहो रः "तस्य समूहः" ४।२।३७ इति नरशब्दात् समू-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

हेऽर्थे, अणि नरस्य पृषोदरादित्वात् रादेशे, अथवा नलोपे कृते "यस्येति च" ६।४।१४८ इत्यकारलोपे 'र' इति सिद्धम्। रः पदार्थसमूहो विद्यते यस्मिन् स र इति। अथवा—"चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन ! आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ !" इति (गी० अ० ७ श्लो० १६) इति चतुर्विधस्वाश्रितेभ्योऽखिलान् धर्मार्थकाममोक्षान् राति ददातीति रः। यद्वा सर्वत्र राजते इति रः। सर्वत्र देदीप्यमान इत्यर्थः। यद्वा रमन्ते योगिनो यत्र स रः सर्वेषां रमणाश्रयभूतो रामः। अथवा रीयन्ते लीयन्ते निवसन्ति यत्रेति रः, यस्मिन् सर्वाणि भूतानि निवसन्ति सन्ति लीनानि च भवन्तीत्यर्थः। 'र' इत्यत्राकरस्योपर्युक्तो वकारवदुदात्तत्वम् ज्ञेयम्।

५—"इ" ईयते परब्रह्म गच्छति यया सा ईः तत्सम्बुद्धौ हे इ ? परब्रह्म प्रापयित्रि ! लक्ष्मि ?। "ईङ् गतौ" इति दिवादिगणपठिताद् ई धातोः करणे क्विपि, तस्य सर्वापहारे "कृत्तद्धितसमासाश्च" ((१।२।४६) इति प्रातिपदिकसंज्ञायाम् "सम्बोधने च" =(२।३।४७) इति प्रथमा; तस्या एकवचनविवक्षायां सौ, अस्याः "एकवचनम् सम्बुद्धिः" २।३।४९ इति सम्बुद्धिसंज्ञायाम्; तदन्तरम् "यूस्त्र्याख्यौ नदी" १।४।३ इत्यनेन 'ई' इत्यस्य नदीसंज्ञायाम् "अम्बार्थनद्योर्ह्रस्वः ।। ७।३।१०७ इति ह्रस्वत्वे "एङ्ह्रस्वात्सम्बुद्धेः" ६।१।६९ इति सकारस्य लोपे इ इति रूपम् सिद्धं वेदितव्यम्। ननु इदन्तराभावात् कथं नदीसंज्ञा इति शङ्कनीयम्- इह-ईवर्णोवर्णयोरेव नदी संज्ञा, इत्यपि पक्षस्य जागरूकत्वात्। जागरूकता चः—"इवर्णयोरेव संज्ञेत्यपि पक्षोस्ति। "आच्छीनद्योः"—'इति सूत्रस्वरसात्। तयोः स्त्र्याख्यत्वं तु ङ्यादिषु स्वतः, तन्त्रीलक्ष्मीरित्यादौ तु स्त्रीवाचकवर्णसमुदाये घटकत्वेन प्रवेशात्। तेन नद्यन्तादिव्यवहारो न विरुद्धयते"। इत्यस्यां तत्त्वबोधिन्यां सुस्पष्टं विराजते। अन्यथा भवन्ती, पचन्ती, दिव्यन्ती इत्यत्र "उगितश्च" ४।१।६ इति विहितस्य ङीपे नदीत्वे "शप्श्यनोर्नित्यम्" ७।१।८१ इत्यनेन यन्नित्यं नुम् विधीयते तद् लभं स्यात्। अथवा आभ्यामिव एकस्मिन् व्यपदेशिवद्भावेन तदन्तविधित्वात् नदीत्वे ह्रस्वत्वे सुलोपेऽत्र कृते हे इ ? इति रूपं सिद्धं वेदितव्यम्। "आमन्त्रितस्य च" ८।१।१९ इत्यनुदात्तत्वे कृते ततः रेफोत्तरवर्त्यकारेण सह गुणे च कृते 'रे' इति रूपं जातम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अत्रैकारस्य "स्वरितो वाऽनुदात्ते पदादौ" ८।२।६। इति वैकल्पिकस्वरितत्वे कृते 'रे' इति रूपं जातम्।

६—"एयम्" णीयते नीयते = साधकोत्तमैः प्राप्यते यः स णीः। षष्ठी-युक्तश्छन्दसि वा" (१।४।६) षष्ठ्यन्तेन युक्तः पतिशब्दश्छन्दसि घिसंज्ञो वा स्यात्। क्षेत्रस्य पतिना वयम्। इह वेति योगं विभज्य छन्दसि इत्यनुवर्तते। तेन "सर्वे विधयश्छन्दसि वैकल्पिकाः" "बहुलं छन्दसि" इत्यादिरस्यैव प्रपञ्चः। अतः "णो नः" ६।१।६५ इत्यस्य वैकल्पिकत्वेन नत्वाभावपक्षे णीयते इति रूपं जायते। ततः कर्मणि क्विपि, क्विपः सर्वापहारे कृते णीरिति सिद्धम्। अत्र णीशब्दस्य प्रातिपदिकसंज्ञायां द्वितीयैकवचनविवक्षायां 'णी अम्' इति स्थितौ "इको यणचि" ६।१।७७ इति प्राप्तं यणं प्रबाध्य "अमि पूर्वः" ६।१।१०७ इति पूर्वरूपं प्राप्तम। तत्प्रबाध्य "अचि श्नुधातुभ्रुवां य्वोरियङुवङौ" ६।४।७७ इतीयङ् विधाय कस्यापि छन्दसि वैकल्पिकत्वेनाप्रवृत्तौ "अमिपूर्वः" ६।१।१०७ इति पूर्वरूपं प्राप्तम्। अस्यापि वैकल्पिकत्वेनाप्रवृत्तौ "इको यणचि" ६।१।७७ इति यणादेशे कृते "एयम्" इति रूपं जातम्। अत्र "अनु-दात्तौ सुप्पितौ" ३।१।४ इति यकाराकारस्यानुदात्तत्वम् सिद्धम्। ननु 'वरेण्यम्' इत्यत्र "वृषादीनाञ्च" (६।१।२०३) इत्यनेनैव वकारोत्तरवर्त्तिनोऽकारस्य उदात्तत्वे "अनुदात्तं पदमेकवर्जम्" (६।१।१५८) इत्यनेनावशिष्टयोरनुदात्तत्वे "उदात्तादनुदात्तस्य स्वरितः" इत्यनेन रेफोत्तरवर्त्तिन एकारस्य स्वरितत्वं सिद्ध्यत्येव; किं पुनः भगीरथप्रयासेन व, र, इ, एयम् इति महत्या क्लिष्टकल्पनया न किमपि लाभो भवितुमर्हतीति न वाच्यम्। "वृषादी-नाञ्च" (६।१।२०३) इति वृषादिगणपरिगणनसमये स्वयं श्रीमद्भगवता पाणिनिना "वृषः, जनः,..............कल्पः, पादः, इति वृषादिराकृतिगणः" इति विलिख्य "अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम् ॥४॥" इति सुलेखेन 'यस्य क्वापि न गतिः तस्य वाराणस्यां गतिरिव यत्र केनाप्याद्युदात्तत्वं, ततः परस्य स्वरितत्वं न सिद्ध्यति तस्य वृषादिगणे कल्पयित्वा आद्युदा-त्तत्वस्वरितत्वे साधयितव्ये इत्युपदिष्टम्। यथा अखिलवेदेषु यत्र यत्र 'वृष' शब्दो विद्यते तत्र तत्र तस्य आद्युदात्तत्वमन्तस्वरितत्वं च दृश्यते, तथा "वृषादीनां च (६।१।२०३)" विहाय नान्येन सूत्रेण वार्तिकेन वा आद्युदा-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्तत्वमन्तस्वरितत्वं वृषशब्दस्य साधयितुं शक्यते केनचित् यतोहि "वृषु सेचने" इत्यस्मात् वृष् धातोः "इगुपधज्ञाप्रीकिरः कः......" इति कप्रत्यये ककारस्येत्संज्ञायां लोपे च प्रत्ययस्य कित्वादुपधाभूतर्कारस्य गुणाभावे वृष इत्यस्य "कृत्तद्धितसमासाश्च" इतिप्रातिपदिकसंज्ञायां सौरुत्वे विसर्गे च कृते वृषः इति सिद्ध्यति। अत्र ऋकारस्य "धातोः"...... । इत्यनेन अन्तोदात्तत्वम् "आद्युदात्तश्च........" इत्यन्ताकारस्य चोदात्तत्वमेव भवितुमर्हति, तथा च 'वृषः' इत्याकारकरूपो भविष्यति नतु-अन्तस्वरितत्वघटित-वृषशब्दः कथमपि सिद्धो भवितुमर्हति, अतएव भगवता पाणिनिना,एतादृशानां शब्दानां साधनार्थं "वृषादीनां च" इतिसूत्रं रचितम्। अतएव आद्युदात्तत्वान्तस्वरितत्वघटितवृषशब्दसदृशशब्दान् वृषादिगणे प्रकल्प्य यथेष्टसिद्धिर्भवति यथा वेदेषूपलभ्यते, नान्येषां शब्दानां वृषादिगणे कल्पना समुचिता भविष्यति। येषामाद्युदात्तत्वं ततः परस्य स्वरितत्वं प्रकारान्तरेण सिध्यति तेषां वृषादिगणे पाठो विधातुं न शक्यते, अतएव भगवता पाणिनिना "अविहितलक्षणमाद्युदात्तत्वं वृषादिषु ज्ञेयम् ॥४॥" इति प्रदर्शितम्। अस्य सूत्रस्य व्याख्यायां स्वनामधन्यप्रसिद्धवैयाकरणश्रीमन्नागेशेन सुस्पष्टं प्रतिपादितम्—तथाहि—"वृषादीनाञ्च" वृषु सेचने। इगुपधलक्षणः कः। आकृतिगण इति। फिट् सूत्रेषु 'ग्रामादीनाञ्च' इति पठितं सोऽप्याकृतिगणः। एवं चाविहिताद्युदात्तस्य वृषादित्वं ग्रामादित्वं वा बोध्यम्। अन्तोदात्तस्य तूञ्छादित्वं, घृतादित्वं वा बोध्यम्। एवञ्च द्वाभ्यामेव सूत्राभ्यां सर्वेष्टसिद्धावितरसूत्रद्वयप्रणयणं कर्त्तभेदान्नदोषायेति दिक्।

७—भर्गः= "भर्गो" 'भ्रस्जपाके'। असुन्। "भ्रस्जोरोपधयोरमन्यतरस्याम्" ६।४।४७ इति रोपधयोर्लोपो रमागमश्च न्यङ्क्वादिपाठात् कुत्वम् इति श्रीमत्सायनाचार्य्येणोक्तम्, तन्न समीचीनम्।

इदानींतनोपलभ्यमानपुस्तकेषु न्यङ्क्वादिगणे भर्गशब्दस्यादर्शनात्। भर्जते, "भृजी भर्जने" (भ्वा० आ० से०) "पचाद्यच्" ३।१।१३४ न्यङ्क्वादित्वात् कुत्वम्। इत्यमरकोषस्य सुधाख्यव्याख्यायामुक्तम्। तदपि नसमीचीनम्। न्यङ्क्वादिगणे भर्गशब्दस्यादर्शनात्। न्यङ्क्वादेरनाकृतिगणत्वाच्च कुत्वं न स्यात्। पचादित्वादचि कृते "चितः" ६।१।१६३

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्यन्तोदात्तत्वेनादेरनुदात्तत्वाद्गकारोत्तरौकारस्य स्वरितत्वं च न स्यात्। अस्य भर्गशब्दस्य विग्रहस्तु भृज्यन्ते भक्तानां काम-क्रोध-लोभ-मोह-मद-मात्सर्यादयोऽनेनेति भर्गः। अथवा भर्जते भगवद्भक्ति-भगवत्प्राप्तिविरोधि-कामादिप्रतिभटान् योऽसौ भर्गः, इति। "कृत्यल्युटो बहुलम्" ३।३।११३ इत्यस्य सूत्रस्य महाभाष्ये "कृतो बहुलमिति वक्तव्यम्" इत्युक्तम्। याभ्यः प्रकृतिभ्य एष्वर्थेषु विहिता ये कृत्संज्ञकाः प्रत्ययास्ते ततोऽन्यत्रापि स्युरित्यर्थकेनोक्तवार्तिकेन "रामो रमयतां वरः" इति वत् कर्त्तरि घञ्। चस्य जस्य च कुत्वं स्याद् घिति ण्यति च प्रत्यये परे इत्यर्थकेन "चजोः कुघिण्ण्यतोः" ७।३।५२ इति सूत्रेण कुत्वे गुणे च कृते 'भर्ग' इति निष्पन्नम्। अत्र स्वर-संचारस्तु "ञ्नित्यादिर्नित्यम्" ६।१।१९७ इत्यनेन ञिदन्तत्वादादिरुदात्तः। "अनुदात्तं पदमेकवर्जम्" ६।१।१५८ इति गकारास्यानुदात्तत्वे तस्य च "उदात्तादनुदात्तस्य स्वरितः" ८।४।६६ इत्यनेन स्वरितत्वम् सिद्धम्।

'देवस्य' इत्यनेन सह संहितायां तु "ससजुषो रुः" ८।२।६६ इति रुत्वे "हशि च" ६।१।११४ इत्युत्वे 'स्थानेऽन्तरतमः" १।१।५० इत्यनेन सहैकवाक्यतया "आद्गुणः" ६।१।८७ इत्यनेन पूर्वोक्तरीत्या संसाधितस्वरितत्वाद्भर्गघटकगकारोत्तरवर्त्त्यकारात् परस्य भर्गस् इति सकारस्थानीयोकारस्यापि सुप्त्वात् "अनुदात्तौ सुप्पितौ" ३।१।४२ इत्यनुदात्तत्वे तस्मिन् परे पूर्वपरयोः = भर्गघटकगकारोत्तरवर्तिस्वरिताकारसकारस्थानीयानुदात्तोकारयोः स्थाने सदृशतमे स्वरिते-ओकारे कृते "भर्गो देवस्य" इत्यत्र गकारोत्तरवर्त्तिनः ओकारस्य पुनः स्वरितत्वमेव सिद्धम्।

ननु स्वरिताकारानुदात्तोकारयोः स्थाने अनुदात्तौकारस्य सदृशतमत्वम् कथं न वाच्यम् इति चेन्न। तत्र स्वरितत्वस्याभावात्, स्वरितौकारे तु उदात्तानुदात्तत्वे वर्णधर्मौ समाह्रियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यादिति परिभाषणत्वेनानुदात्तत्वस्यापि समाहरणात्।

८—देवस्य = दीव्यतीति विग्रहे पचादित्वादचि कृते देव इति निष्पन्नम्-अस्य देवशब्दस्य निर्वचनं निरुक्तदैवतकाण्डे अ०।७।ख०।१५। एवं लिखितमस्तिः—"देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः सा देवता" तस्य देवशब्दस्य चिदन्तत्वात् "चितः" ६।१।१६३ इति सूत्रम

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"चितःसप्रकृतेर्बह्वकजर्थम्" इत्याभ्यां चिदन्तस्य देवशब्दस्वरूपस्यान्त उदात्तः "अनुदात्तं पदमेकवर्जम्" ६।१।१५८ इत्येकारस्यानुदात्तत्वम्। "स्य" इत्यस्य सुप्त्वात् "अनुदात्तौ सुप्पितौ" ३।१।४ इति अनुदात्तत्वम् "उदात्तादनुदात्तस्य स्वरितः" ८।४।६६ इति स्यस्याकारस्य स्वरितत्वं च सिद्धमिति।

९—धीमहि=ध्यायेम। "तिङ्ङतिङः" ८।१।२८ इति सर्वस्यानुदात्तत्वम्। "स्वरितात्संहितायामनुदात्तानाम्" १।२।३९ इतिसर्वेषामनुदात्तानामेकश्रुतिः।

१०—धियः=ध्यायत्यनयेति धीः, ध्यानं धीः इति वा। "ध्यायतेःसम्प्रसारणं च" ३।२।१७८ इति क्विपि सम्प्रसारणे क्विपः सर्वापहारे च कृते धीरिति सिद्धम्। क्विबन्तं धातुत्वं न जहाति प्रातिपदिकत्वं च मुञ्चतीत्युभयोः सतोः "फिषोन्त उदात्तः" १।१। इति फिट्सूत्रम् 'धातोः" ६।१।११२ इति पाणिनिसूत्रं च इत्याभ्यां 'धी' इत्यत्र धकारोत्तरवर्त्तीकारस्योदात्तत्वम्। उदात्तान्तादस्माद्द्वितीया बहुवचनविवक्षायां समागतस्य शसोऽकारस्य "अनुदात्तौ सुप्पितौ" ३।१।४३ इत्यनुदात्तत्वम्। ततः "अचिश्नुधातुभ्रुवां य्वोरियङुवङौ" ६।४।७७ इत्युदात्तेकारस्थाने सद्भशतमे यङादेशे 'धियस्' इत्यस्य 'यो' इत्यनेन सह संहितायाम् "ससजुषो रुः" ८।२।६६ इति धियस्सकारस्य रुत्वे "हशि च" ६।१।११४ इति रोरुत्वे "आद्गुणः" ६।१।८७ इत्यनेन अनुदात्ताकारोकारयोः स्थाने अनुदात्तौकारे कृते पुनः धियो यकारोत्तरवर्त्तिन ओकारस्यानुदात्तत्वमेव सिद्धम्।

११—"यो" - इत्यत्र 'य' फिट्स्वरेणान्तोदात्तः, ततः परस्य सकारस्य रुत्वे, उत्वे कृते "आद्गुणः" ६।१।८७ इत्यनेन गुणे च कृते "एकादेश उदात्तेनोदात्तः" ८।२।५ इत्यनेन उदात्तेन सहैकादेशादोकारोऽप्युदात्तः। अत्र "यः" इति पदम् यच्छति=विषयेभ्य उपरमयति पृथक्करोति, अथवा विषयान्निवारयति सुवति निखिलब्रह्माण्डानि उत्पादयति तत्रैव दीव्यति राजते रमते तत्रस्थेभ्यो भक्तजनेभ्यो निखिलान्कामान् राति चान्ते रीयते=क्षीयते इत्यादि क्रियाणां कर्त्तारं स्मारयतीति वेदितव्यम्।

१२ "नः"=अस्मान् इत्यस्य स्थाने "पदस्य" ८।१।१६ "पदात्" ८।१।१७ "अनुदात्तं सर्वमपादादौ" ८।१।१८ इत्यस्य पदत्रयस्यापादपरि-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

समाप्तेरधिकृतत्वे "बहुवचनस्य वस्नसौ" ८।१।२१ इत्यनेन नसादेशस्यानुदात्तत्वे अनुदात्ताच्कत्वविशिष्टं "नः" इति पदं सिद्धम्। तस्य "यो" इत्यनेन सह संहितायाम् "उदात्तानुदात्तस्य स्वरितः" ८।३।६६ इति स्वरितत्वम्।

१३—प्रचोदयात्=इत्यत्र "प्र" इत्यस्य पाणिनिमते "वृषादीनां च" ६।१।२०३ इत्याद्युदात्तत्वम्। शान्तनवाचार्य्यमते "निपाता आद्युदात्ताः" ४। ८० इत्याद्युदात्तत्वम्। "चुद संचोदने" इत्यस्य चुरादिगणपठितत्वेन धातुसंज्ञायां पूर्वं धातुरुपसर्गेण युज्यते पश्चात्साधनेनेति। "ते प्राग्धातोः" १।४।८० इत्यनेन धातोः प्राक् "प्र" इत्यस्य योगस्ततो "धातोः" ६।१।१६२ इत्युकारस्योदात्तत्वम्। ततो णिच् प्रत्ययस्य "चितः" इत्यन्तोदात्तत्वम्। "सनाद्यन्ता धातवः" ३।१।३२ इति पुनर्धातुसंज्ञायाम्। ततो "व्यत्ययो बहुलम्" ३।१।८५ इति बाहुलकत्वेन लिङ्विषये हि लेटि तत्स्थाने तिबादेशे कृते शप्प्रत्ययः, अस्याकारस्य "अनुदात्तौ सुप्पितौ" ३।१।४ इति-अनुदात्तत्वेऽस्मिन् शबकारे परे गुणे, अयादेशे च कृते "प्रचोदयति" इति जातम्; ततः 'उदात्तानुदात्तस्य स्वरितः" ८।४।६६ इति शबकारस्य स्वरितत्वे कृते "प्रचोदयति" इति जातम्; ततः "लेटोऽडाटौ" ३।४।९४ इत्याडागमे, "स्थानेऽन्तरतमः" १।१।५० इति परिभाषया सहैकवाक्यतया "अकः सवर्णे दीर्घः" ६।१।१०१ इति दीर्घाकारस्यापि स्वरितत्वम्; "इतश्च लोपःपरस्मैपदेषु" ३।४।९७ इतीकारस्य लोपे कृते प्रचोदयादिति सिद्धम्।

इतिविग्रहः स्वरसंचारश्च समाप्तः।

अथ वाक्ययोजना

हे इ !=हेमातर्लक्ष्मि ! यः श्रुतिस्मृतिषु प्रसिद्धः "सविता"=शुद्धमलिनोभयात्मकविभूतेः स्रष्टा "देवः"=त्रिपादविभूतेरुपरि भागे आथर्वणमन्त्रप्रतिपादिताऽपराजिताऽयोध्याख्ये परात्परधाम्नि द्योतमानः। "रः"= शुद्धमलिनोभयात्मकविभूतौ रममाणत्वेन रमयितृत्वेन राजमाणत्वेन वा श्रुतिस्मृतिषु प्रसिद्धः "रः"=रामः। "धियः"=धीमताम् बुद्धीः। "प्रचोदयात्"=प्रेरयति। "तत्"=तस्य सवितुः शुद्धेति मलिनेति प्रसिद्धोभयविभूतेरेकोऽहं बहु स्यामिति संकल्पेनोत्पादकस्य "देवस्य"=

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अयोध्याख्ये परात्परधाम्नि द्योतमानस्य "र" = रस्य उभयविभूतिं सृष्ट्वा तदनुप्रविश्य रममाणस्य राजमाणस्य रमयितुः वा उपासकेभ्योऽर्थधर्मकाममोक्षाणां रातुर्दातुः वा रामस्य "भर्गः" स्वपरस्वरूपावरोधिका याऽविद्या तया सह तत्कार्यजातस्य भर्जकम् । "एयम्" अर्थधर्मकाममोक्षार्थिभिरुपासकैर्ध्यातृभिर्ध्येयत्वेन प्राप्यम् सच्चिदानन्दघनं रामस्य दिव्यमङ्गलविग्रहम् । "व" = यथा "धीमहि" = ध्यायेम तथा "नः" = अस्मान् कुरु इतिशेषः ।

इति वाक्ययोजना

॥ इति ब्रह्ममुखपरिचयः समाप्तः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रीमते रामचन्द्रायनमः ।

अथ मन्त्रतत्त्वार्थचिन्तामणिः

ऋग्वेदे

सचन्त यदुषसः सूर्य्येण चित्रामस्य केतवो रामविन्दन् । आ यन्नक्षत्रं ददृशे दिवोन पुनर्यतो न किरद्धा नु वेद ॥ ७ ॥ [अ० ८ । अ० ६ । व. ११]

सचन्त इति ॥ व्रतवन्धनसमयोपलब्धगायत्रीविद्यार्थभूतस्य सवितुर्देवस्य भर्गाख्ये तेजसि मनसः स्थितिं विदधतः । अथवा भर्गाख्यन्तेजो मनसा सेवमाना ध्यायमाना वा सन्तः (यत्) ये (केतवः) सवितुर्देवस्य व्यापकं यत्तेजः, तज्ज्ञानवन्तः (उषसः सूर्येण) प्रातःकालीनसूर्येण (न) सदृशं देदीप्यमानमिति शेषः । (राम्) राम् इत्याकारकमक्षरं पदस्वा (दिवः) दिवि हृदयाकाशे (अविन्दन्) अलभन्त, नाम ददृशिरे । त एव ज्ञानिनः (पुनः) (चित्रामस्य) चित्रभानुत्वात् चित्रो वह्निः रेफः—रमन्ते सर्वभूतान्यस्मिन्निति 'रः' कार्यब्रह्म । अमन्ति महाप्रलयदशायां गच्छन्ति भूतान्यस्मिन्निति "आमः" कारणब्रह्म । चित्रश्चासौ आमश्चेति चित्रामः, तस्य चित्रामस्य । अत्र सम्बन्धमात्रविवक्षायां कर्मणि षष्ठी । अर्थात् कार्यकारणात्मक परब्रह्मणो वाचकं राम् इतिपदम् (आयम्) आ य इत्याकारकाक्षरद्वयम् (नक्षत्रम्) नक्षत्रेशं चन्द्रं "विनापि प्रत्ययं पूर्वोत्तरपदयोर्वा लोपो वाच्यः" इतीशपदस्य लोपे, चन्द्रवाचकनक्षत्रपदं "हृदयान्मनो मनसश्चन्द्रमाः" इतिश्रुतिसिद्धं चन्द्रपरस्य कारणं हृदयं बोधयति । हृदयपदेनागमशास्त्रप्रसिद्धं (नमः) इतिपदं ग्राह्यं भवति । तथाच पूर्वोदितवर्णेषु एकत्रीकृतेषु "रां रामाय नमः" इति कार्यकारणात्मकतारकब्रह्म, स्वरूपतः शब्दतश्च (ददृशे) ददृशिरे "व्यत्ययो बहुलम्" (पा. सू. ३।१।८५) इति तिङो व्यत्ययः । (यतः) पूर्वोक्तपदघटितषडक्षरसमुदायात् । अर्थात् "रां रामाय नमः" इति तारकब्रह्माख्य-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मन्त्रतः—(न किरद्ध) हेति निश्चयेन लोकः न किरत्, न किरति, संसारसागरे न पतति, तं मन्त्रं (अनुवेद) पूर्वोक्तकेतवो ज्ञानिनो लोकहितार्थं प्रकाशमनुवदन्ति स्म। वहिरुपदिदिशुः शिष्येभ्यः, इत्यर्थं भगवान् वेद एव वक्तीति सुजनैर्निष्पक्षपातैस्तपस्विभिरेव वेदितुं शक्यते। नहि वेदार्थो ब्रह्मचर्यविहीनैर्भोजनादिसंयमशून्यैर्गृहीतविधिहीनविद्यैरतपस्विभिर्वेदितुं शक्यते, इति श्रुत्यन्तरेषु स्मृतिषु च प्रसिद्धम्। अतः संयमपुरस्सरं गृहीतविद्यैर्विवेक्तव्यो वेदार्थ इति निवेदनम् विद्वच्चरणगृहीताल्पविद्यस्य श्रीवलभद्रदासस्यानुष्ठायैवानुभवन्तु सुधिय इति। इति।

२—अथवा—

सचन्त, यत्, उषसः, सूर्येण, चित्, राम्, अस्य, केतवः, राम्, अविन्दन्, आयम्, नक्षत्रम्, ददृशे, दिवः, न, पुनः, यत्, न, किरत्, ह, अनुवेद, इति पदच्छेदं कृत्वा—(अस्य) इत्यत्र कर्मणि षष्ठी। "अकारो वासुदेवः स्यात्" इति कोषात्, व्यूहवासुदेवं वासुदेवं परवासुदेवं (सचन्त) "षच समवाये" इति धातुस्मरणात्, उपर्युक्तवासुदेवत्रये क्रमशो मनसः सम्बन्धं कुर्वन्तः सन्तः (केतवः) वासुदेवत्रयज्ञानवन्तः (चित्) परात्परवासुदेवस्य श्रीरङ्गेशाख्यस्य रामस्य ज्ञानं (अविन्दन्) अलभन्त। अत्र जश्त्वाभावश्छान्दसत्वाद्वेदितव्यः। तज्ज्ञानस्य प्रकारं प्रदर्शयन् भगवान् वेद एव—आह। (उषसः सूर्येण) प्रातःकालीनसूर्येण (न) सदृशं "नेति प्रतिषेधार्थीयो भाषायाम्॥ ७॥ "उभयमन्वध्यायम्॥ ८॥ इति निरुक्तात्। "नेति प्रतिषेधार्थीयो भाषायाम् प्रसिद्धः॥ १।४।७॥ "उभयमन्वध्यायम्" अन्वध्यायं छन्दसि 'न' इति प्रतिषेधार्थीय उपमार्थे च, इत्युभयमपि द्रष्टव्यम्॥ १।४।८॥ इति दुर्गाचार्यकृतव्याख्यया स्पष्टार्थकेनोपर्युक्तनिरुक्तेन 'न' इत्यव्ययपदस्य सदृशार्थकत्वं स्पष्टम्। तथा च—प्रातःकालीनसूर्येण सदृशं देदीप्यमानमिति शेषः (दिवः) हृद्गगने। सप्तम्यर्थेऽत्र षष्ठी वेदितव्या, (पुनः) त एव ज्ञानिनः (राम्) (राम्) (आयम्) (नक्षत्रम्) पूर्वोक्तप्रकारेण 'नमः' इति पदं (ददृशे) ददृशिरे। "व्यत्ययो वहुलम्" इति तिङो व्यत्यये कृते बहुत्वं विज्ञेयमिति। शेषः पूर्ववत्।

RajGuru Math,.Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३—अथवा—

(यत्) यस्य (रामस्य) परब्रह्मणः (चित्) स्मृतिम्, "चितिस्मृत्याम्" इति धातोः स्मृत्यर्थकत्वात्। "आहारशुद्धौ खलु सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः" इतिवदत्र स्मृतिशब्दो ध्यानपरः। तथा च यस्य रामस्य ध्यानं (सचन्तः) कुर्वन्तः सन्तः (केतवः) ज्ञानवन्तः उपासकजनाः (दिवः) हृद्गगने (उषसः सूर्य्येण) प्रातःकालिकसूर्य्येण (न) सदृशं (राम्) राममन्त्रस्य बीजं "रां" इत्याकारकपदम् (अविन्दन्) अलभन्त ददृशिरे इत्यर्थः। (पुनः) तस्यैव राममन्त्रस्य द्वितीयवारं तदेव बीजं "राम्" (आयम्) (नक्षत्रम्) पूर्वोक्तरीत्या 'नमः' पदं (ददृशे) ददृशिरे। शेषः पूर्ववत् वेदितव्यः।

४—अथवा—

(राम् ?) हे राम ? हे कार्यकारणात्मक परब्रह्म ? रश्चासौ आमश्चेति व्युत्पत्तेः (यत्) ये (केतवः) उपासितशुद्धाचारविचारदक्षगुरुत्वेनोपलब्धयथार्थशास्त्रीयज्ञानवन्तो जनाः (सचन्तः) स्वस्वाम्यादिभावसम्बन्धं त्वत्तः कुर्वन्तः सन्तः "षच् समवाये" समवायः सम्बन्ध इति स्मरणात्। स्वहृद्गगने प्रातःकालीनसूर्य्येण सदृशं (स्य) तत् (चित्) स्वस्वरूपम् आत्मवस्तु (अविन्दन्) अलभन्त 'स्य' इत्यत्र त्यच्छब्दात् सौ "त्यदादीनामः" इत्यत्वे, 'तदोः सः सावनन्त्ययोः" इति सत्वे, रुत्वे, 'रोरि" इति रेफस्य लोपे "बहुलं छन्दसि" इति "ढ्लोपे पूर्वस्य दीर्घोऽणः" इत्यस्याप्रवृत्तौ 'स्य' इति सिद्धम्। अत्र द्वितीयार्थे प्रथमा वेदितव्या। परिपक्वोपासनतया त एव केतवः स्वहृद्गगने प्रातःकालिकसूर्य्येण सदृशं देदीप्यमानं (राम्) तव तारकब्रह्ममन्त्रराजस्य बीजं (ददृशे) (पुनः) तदेव बीजं 'राम्' (आयम्) (नक्षत्रम्) पूर्वोक्तरीत्या 'नमः' इति पदं (ददृशे) ददृशिरे। शेषः पूर्ववत्। इति स्तुतिमन्त्रः।

५—अथवा—

(रामस्य) कार्यकारणात्मकपरब्रह्मणः (चित्) चेतन्तीति 'चित्' ध्यातारः। "चितिस्मृत्याम्" इत्यस्मात् कर्त्तरि क्विपि प्रातिपदिकसंज्ञायाम्,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जसि "सुपां सुलुक्" इति लुकि च कृते 'चित्' इति बहुवचनान्तं पदम्। "ध्रुवा स्मृतिः" इतिवदत्र स्मृतिशब्दो ध्यानपरः "श्रद्धा-वीर्य्य-स्मृति-समाधि-प्रज्ञापूर्वक इतरेषाम्" (यो० सू० स० पा० २०) अत्रापि स्मृति-शब्दो ध्यानपरः, समाधेः पूर्वप्रयोगात्। वाचस्पतिमिश्रा अपि 'स्मृतिः'=ध्यानम्, इत्येव लिखितवन्तः। अतः स्मृतिशब्दस्य ध्यानेऽपि शक्तिः, "कर्त्तृकर्मणोः कृति" इति रामशब्दात् कर्मणि षष्ठी। तथा च रामस्य चित्=ध्यातारः, ये (केतवः) रामोपासकाः (राम्-अविन्दन्) राममन्त्रस्य बीजं अलभन्त, ते (सचन्त) सचन्तीति सचन्तः "षच् समवाये" इत्यतः शतरि जसि च कृते बाहुलकात् सकारस्य रुत्व-मविधायैव "क्वचिदन्यदेव" इति लोप एव जातः। तथा च—सचन्तः सन्तो नाम मनसोपांसुना वाचा च 'राम्' पदं स्वं बध्नन्तः सन्तः, (पुनः) राम् पदम् (आयम्) (नक्षत्रम्) पूर्वोक्तरीत्या 'नमः' पदं (ददृशे) ददृशिरे "व्यत्ययो बहुलम्" इत्येकवचनम्। शेषः पूर्ववत्।

६—अथवाः—

(केतवः) अष्टाक्षर-द्वादशाक्षरादिविष्णुमन्त्रवन्तः श्रुतिस्मृत्याचार्यतः 'रामः परं कारणम्' इति श्रुत्वा यथोपलब्धं मन्त्रं जपन्तः रामस्य परमकारणस्य (चित्) ध्यातारः सन्तः (राम् अविन्दन्) राममन्त्रस्य बीजं प्रातःकालीनसूर्य्यसदृशं देदीप्यमानं हृदयाकाशे अलभन्त। तदेव बीजं (सचन्तः) मनसा वाचा उपांसुना च संबध्नन्तः सेवमाना वा सन्तः (पुनः) (राम्) (आयम्) (नक्षत्रम्) 'नमः' पदम् उषसः सूर्य्येण समं देदीप्यमानं (दिवः) हृद्गगने (ददृशे) पुनः ददृशिरे इत्यर्थः (यतः पुनर्न किरद्धानुवेद) यतः षडक्षरात् तारकब्रह्मणः 'ह' इति निश्चयेन (न किरत्) संसारसागरे न किरति, न विक्षिप्तो भवति जनः इति शेषः। अतोऽष्टाक्षरादिमन्त्रवन्तस्ते महात्मानः षडक्षरं लब्ध्वा (अनुवेद) बहिः शिष्येभ्यः तं षडक्षरमन्त्रराजम् अनुवादयामासुः=प्रकाशयामासुरित्यर्थः। अतएव श्रीभाष्यकारादर्वाचीना आचार्य्याः पूर्वमष्टाक्षरादिमन्त्रमुपास्यैव पश्चात् षडक्षराधिकारितां लब्धवन्त इति श्रीसम्प्रदाये उद्घोषो विद्यते। श्रीनाभास्वामिभिस्तु श्रीभाष्यकारविषये

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्पष्टं प्रतिपादितम् 'भक्तमालनामके' ग्रन्थे। तट्टीकायां चातिस्पष्टं वर्त्तते, नात्रास्माकमपराधलवोऽपि वेदितव्यः। शेषः पूर्ववत्।

७—अथवाः—

(रामस्य केतवः) कार्यकारणात्मकब्रह्मणः पूजिका, अन्यायपथ-प्रवृत्तजननाशार्थं क्रोधयित्री वा "चायृ पूजानिशामनयोः" ऋदि ञायधातोः "चायः की" इति तुप्रत्ययपरे क्यादेशे केतुरित्यस्य निष्पन्न-त्वात्। "एकस्या एव पूजनार्थे बहुवचनं स्यात्" इति निरुक्ताद् बहुव-चनम् (चित्) सीता "हेमाभया द्विभुजया सर्वालंकृतया चिता। श्लि-ष्टः कमलधारिण्या पुष्टः कोशलजात्मजः" इति पूर्वरामतापनीयवच-नात्, (सचन्तः) रामं सेवमाना सती "तमसा सचन्ताम्" (ऋ० सं० ८।५।२३।६।" इति मन्त्रावयवस्य निरुक्ते "तमसा संसेव्यन्ताम् इति यास्केन व्याख्यातत्वात्। श्रीदुर्गाचार्य्येणापि "सचन्ताम्" "संसेव्य-न्ताम्" इति स्पष्टीकृतत्वाच्च षच् धातोः सेवमानार्थकत्वम् प्रतीयते (न) इति सादृश्ये, तथा च—(उषसः सूर्य्येण) सदृशं देदीप्यमानं (राम्) इति पदं (दिवः) रामात् (अविन्दन्) दीव्यति = रमते सर्वभूतेषु यः स 'दिव्' रामः तस्मादलभन्तेत्यर्थः (पुनः) राम् (आयम्) (नक्षत्रम्) पूर्वोक्तरीत्या 'नमः' पदम् (अविन्दन्) पश्चात्तदर्थं च (ददृशे) पश्चात् रामत एव षडक्षरमन्त्रराजस्यार्थं ददर्श, नाम ज्ञातवती सीता (यतो न किरद्ध) यतः षडक्षरश्रीराममन्त्रतः 'ह' इति निश्चयेन लोकः संसारसागरे न किरत्' न किरति न विक्षिप्तो भवतीति हेतोः (अनुवेद) लोकहितार्थ-मुपदिदेश विष्वक्सेनमित्यन्यत्राकरे स्पष्टम्।

८—अथवा—

(चित्रामस्य) इत्यत्र 'चित्' 'ऋ' 'आमस्य' इति पदच्छेदं कृत्वा 'चित् पदेन रामतापनीयवचनात् सीता गृह्यते, 'ऋ' पदेन "ऋकारो वेदमाता स्याद् ऋकारो दनुजप्रसूः" इत्येकाक्षरकोषात् वेदमाता गायत्री गृह्यते; तथा च—चिच्चासौ आ चेति "चिता" सीतारूपा गायत्री तया चित्रा अम्यते = गम्यते = प्राप्यते यः स (इति) चित्रामः सीतापतिः। अत्र कर्मणि घञ्। 'चित्रा' अत्र करणे तृतीया तथा च—रामप्राप्तिरूपक्रियायाः सिद्धौ

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्रकृष्टोपकारिकात्वं सीताया एवेति श्रीसम्प्रदाये व्याहारोस्ति "सीता लक्ष्मी-र्भवान् विष्णुः" इति वचनात् लक्ष्मीरित्यपरपर्यायभूता सीतैव श्रीरामं प्रापयति नत्वन्यः। तथा चोक्तम् बृहद्ब्रह्मसंहितायाम्। ३ पा० ६ अ०। वात्सल्यजलधिः श्रीमान् कल्याणादिगणान्वितः। नियोजयति चानेतुं मुक्तात्मानं स्वपार्षदान्" १३। सेनापतिं नित्यवर्गं सायुधावरणान्वितम्। तथा च परिवारं स्वं लक्ष्मीर्देवी न्यवेदयत्"। १४। इत्यारभ्याध्याय-समाप्तिपर्यन्तग्रन्थसंदर्भेण सविस्तरं प्रतिपादितोऽयमर्थः। चिच्चासौ आ चेति 'चिता' इत्यत्र जस्त्वाभावश्छान्दसत्वाद् वेदितव्यः। 'छन्नेभ्यो ङीप्" इत्यस्य "बहुलं छन्दसि" इत्यनेन बाहुल्यादप्राप्तिश्च (प्रवृत्तिश्च) वेदि-तव्या। इत्थञ्च 'चित्रामस्य' = या सीताकरणकजीवकर्तृकरामकर्मकप्राप्ति-क्रिया, तया अस्यमानस्य गम्यमानस्य प्राप्यमाणस्य वा रामस्य (केतवः) ज्ञातारो (यत्) ये जनाः सन्ति, ते (सचन्त) पूर्वोक्तरीत्याऽष्टाक्षर-द्वादशाक्षरविष्णुषडक्षरमन्त्रान् 'सचन्तो' नाम गुरूपदिष्टविधिना मनसा सेवमाना जपन्तो वा सन्तः, (उषसः सूर्य्येण) प्रातःकालीनसूर्य्येण (न) सदृशं (दिवः) हृद्गगने (रामविन्दन्) राम् इत्याकारकाक्षरद्वयं लब्धवन्तः। (पुनः) तत्पश्चात् (राम्) (आयम् (नक्षत्रम्) (ददृशे) ददृशिरे दृष्टवन्तः। अर्थात् पूर्वोक्तरीत्या 'रां रामाय नमः' इति तारकमन्त्रराजं मनसा प्रत्यक्षमकार्षुः। अथवा (न, क्षत्रम्) इत्यत्र 'न' इति पृथक् पदम्, 'क्षत्रम्' पृथक् पदम् तथा च (न) (ददृशे) (क्षत्रम्) (ददृशे) अर्थात् हिंसार्थकसौत्र "क्षद" धातोः "गुधृषी पचि वचि यमि सदि क्षदिभ्यस्त्रः" (११६) इत्युणादिसूत्रेण भावे त्रप्रत्यये कृते 'क्षत्रम्' इति सिद्धम्। अस्य पर्यायवाचिनः भावप्रत्ययान्त-हिंसार्थकसर्वधातुभ्यो निष्पन्नाः सर्वे शब्दा भवितुमर्हन्ति। तथा च "मसि परिणामे" इत्यस्मादपि भावे क्विब्विधानात् 'मः' इति सिद्ध-पदस्य परिणामार्थत्वम् स्पष्टम्। परिणामस्य पूर्वावस्थाया हननमेव। हिंसार्थकक्षत्रपदस्यानेकपर्यायेष्वत्र 'मः' एव पर्यायः समुचितः 'रां रामाय नमः' इति पूर्वोक्ताक्षरराशिस्वारस्यात्। तथा च 'न' = न भवति 'मः' परिणामरूपहिंसनम् पोडनम् यया क्रियया सा नमस्क्रिया। अर्थात्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

रामाय विहितया नमस्क्रियया जन्म-जरा-मृत्युजन्यपीडनं न भवति अतो यथार्थनाम्नी क्रियेति वेदितव्यम्। अथवा (नक्षत्रम्) 'न' विद्यते क्षत्रम् 'मः' परिणामोऽवस्थान्तरं वा यस्यात्मवस्तुनः तन्नक्षत्रापरपर्य्याय-नमःपदवाच्यम्, आत्मवस्तु त्वम् पदार्थः तस्य वाचकं नमः शब्दं ददृशे "नमस्त्वमर्थो विज्ञेयो रामस्तत्पदमुच्यते" ॥१३॥ असीत्यर्थे चतुर्थी स्यादेवं मन्त्रेषु योजयेत्। "तत्त्वमस्यादि वाक्यं तु केवलं मुक्तिदं यतः" ॥१४॥

"भुक्तिमुक्तिप्रदं चैतत्तस्मादप्यतिरिच्यते"। (रामरहस्योप० अ० ५) इति श्रुतेः "तत्त्वमसि" इति वाक्यतोऽप्यस्य मन्त्रराजस्य वैशिष्ट्यं ततोऽप्यधिकफलप्रदत्वादिति स्पष्टोऽयमर्थः सुहृद्भिर्मननीयोऽस्ति न तु दुर्जनैरिति विरम्यते।

॥ इति वैदिकषडक्षरतारकब्रह्मव्याख्या समाप्ता ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ 'सचन्त' मन्त्रे स्वरसंचारः

१—सचन्त । षच् धातोर्व्यत्ययेन परस्मैपदे लटि शतरि शप्यनुबन्धलोपे धातुस्वरेण "धातोः ।६।१।१६२।" सकारोत्तरवर्त्यकार उदात्तः "अनुदात्तौ सुप्पितौ ।३।१।४।" शपोऽकारानुदात्तः। "आद्युदात्तश्च ।३।१।३।" इति शत्रकार उदात्तः "अतो गुणे ।६।१।९७।" शपोऽकारस्य पररूपे "अन्तादिवच्च ।६।१।८५।" इति परादिवद्भावेन शतृप्रत्ययगतलसार्वधातुकत्वमादाय "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः ।६।१।१८६।" इति शतुरकारोऽनुदात्तः तत "उदात्तादनुदात्तस्य स्वरितः। ८।४।६६।" इति स्वरितः। अथवा "बहुलं छन्दसि। २।४।७६" इति शपो लुकि तास्यनुदात्तेदित्यनुदात्तत्वे–उदात्तादनुदात्तस्येति स्वरितत्वं बोध्यम्। ततः प्रातिपदिकत्वाज्जसि तस्य "अनुदात्तौ सुप्पितौ ।३।१।४।" जसोऽकारानुदात्तः। उदात्तस्वरितपरस्य सन्नतरः ।१।२।४०। इत्यनुदात्ततरोऽकारः। विभक्तिसकारस्य रुत्वे छान्दसत्वाद् "हशि च।" इत्युत्वाभावे "भोभगो अघो" इतियकारे परे यत्वे "हलि सर्वेषा" मिति यलोपः।

२—यत् । यच्छब्दः "फिषोऽन्त उदात्तः ।१। इति फिट्सूत्रेणान्तोदात्तः।

३—उषसः । उषस् शब्दान्ङसि फिट् स्वरेणान्तोदात्तो, ङसोऽकारः "अनुदात्तौ सुप्पितौ ।३।१।४।" इति अनुदात्तः। "अनुदात्तं पदमेकवर्जं। ६।१।१५८।" इत्युषस उकारोऽनुदात्तो रुत्वे विसर्गे च "उदात्तस्वरितपरस्येति यदुत्तरस्योषस उकारोऽनुदात्ततरः। "उदात्तादनुदात्तस्य स्वरितः ।८।४।६६।" अस्य त्रिपादीस्थत्वेन "उदात्तस्वरितपरस्य सन्नतरः।१।२।४०। इत्येतद् दृष्टया "पूर्वत्रासिद्धम्" अनेनासिद्धत्वादनुदात्ततर एव विभक्त्यकारः।

६—केतवो—चायृ पूजानिशामनयोर्भौवादिकात्—"चायः को

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

६।१।३५।" इति तुप्रत्यये चायधातोः क्यादेशे कीत्यस्य "धातोः।६।१।१६२।" अन्तोदात्तत्वे "आद्युदात्तश्च ।३।१।३। इति प्रत्ययस्याद्युदात्तत्वे "अनुदात्तं पदमेकवर्जम् । ६।१।१५८। इति कीत्यस्यानुदात्तत्वे प्रातिपदिकत्वाज्जसि गुणे आन्तरतम्याद्रुदात्तावादेशे "अनुदात्तौ सुप्पितौ । ३।१।४।" इत्यनुदात्तत्वे जसि अनुबन्धलोपे रुत्वे उत्वे स्थानेऽन्तरतम इति सहकृतेन "आद्गुणः ६।१।८७। इत्यनुदात्तौकारे केतवो इति ।

४—सूर्य्येण—भौवादिकगत्यर्थकात् सृधातोः "राजसूयसूर्य्येति ।३।१।११४।" सरत्याकाश इति विग्रहे क्यबन्तो निपात्यते यद्वा सू प्रेरणे इति तौदादिकात्, एवञ्च "धातोः ।६।१।१६१।" धातोरन्तोदात्तत्वे "अनुदात्तौ सुप्पितौ । ३।१।४ । इति क्यबनुदात्तम् । सूर्यप्रातिपदिकाट्टाविभक्तौ सुप्त्वादनुदात्तत्वे इनादेशे गुणे "उदात्तादनुदात्तस्य स्वरितः ।८।४।६६ इति सूर्य्येणेतिपदघटकैकारस्य स्वरितत्वम् ।

५—चित्रामस्य । चित्रशब्दः फिषोऽन्त उदात्तः ।१। इति फिट्सूत्रेणान्तोदात्तत्वे "अनुदात्तं पदमेकवर्जम् । ६।१।१५८।" इति चिघटकेकारस्यानुदात्तत्वम् । अमन्ति अस्मिन्निति विग्रहेऽधिकरणे घञ् "धातोः । ६।१।१६२।" धातुस्वरेणान्त उदात्तोऽमिति घञकारः प्रत्ययस्वरेणाद्युदात्तः। "ञ्नित्यादिर्नित्यम् ६।१।१९७।" इत्याद्युदात्तत्वे "अनुदात्तं पदमेकवर्जमित्यनुदात्तो मकारघटकाकारः । ततश्चित्रश्चासावमश्चेति कर्मधारये छान्दसत्वात् समासस्वराभावे "अकः सवर्णे दीर्घः । ६।१।१०१।" इति दीर्घे "उदात्तादनुदात्तस्य स्वरितः । ८।४।६६।" इति मस्याकारः स्वरितः । समासत्वात् प्रातिपदिकसंज्ञायां ङसोऽकारस्य छान्दसत्वेन सुप्स्वराभावे "आद्युदात्तश्च । ३।१।३। इत्याद्युदात्तत्वम् । "स्य" इति पृथक्छेदे त्यछब्दान्निष्पन्नः स्य इति "स्वाङ्गशिटामदन्तानाम् । फि० सू० । २६। इत्याद्युदात्तः सिद्ध एव ।

७—राम् । रां रामाय नम इति मन्त्रराजघटकरामिति रश्चाम चेति द्वन्द्वे "समासस्य ।६।१।२२३।" इत्यन्तोदात्तः, तदनुकृतस्य "अनुकार्य्या-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नुकरणयोरभेदविवक्षेति पक्षेऽर्थवत्त्वाभावेनाप्रातिपदिकत्वाद् विभक्त्यभावे रामित्यपदमेव ।

८—अविन्दन् । विद्लृ लाभे तौदादिकाल्लङि झावन्तादेशे "तुदादिभ्यः शः ।३।१।७७।" इति शप्रत्ययेऽनुबन्धलोपे "इतश्च ।३।४।१००।" इतीकारलोपे "शे मुचादीनाम् ।७।१।५६।" इति नुम्यनुबन्धलोपे "लुङ्लङ्लृङ्क्ष्वडुदात्तः ।६।४।७१।" इत्यडागमे 'धातोः ।६।१।१६२।' इति विद्धातोरिकार उदात्तः । "आद्युदात्तश्च ।३।१।३।" इति विकरणलादेशाकारावुदात्तौ संयोगान्तस्येति तलोपे रामित्यस्यानुकरणत्वेनार्थवत्त्वाभावेनाप्रातिपदिकत्वेन सुबनुत्पत्तौ—अपदत्वेन "तिङ्ङतिङः । ८।१।२८। इत्यस्याप्रवृत्तौ "अनुदात्तं पदमेकवर्जम् ।६।१।१५८। इत्यविन्दनादेरकारोऽनुदात्तः । रामित्युदात्तात् परस्य "उदात्तादनुदात्तस्य स्वरितः ।८।४।६६।" इत्यकारः स्वरितः । अथवा—अनुदात्तं पदमिति लादेशाकारं विहाय सर्वेषामनुदात्तत्वेऽपि "रामित्यस्मात्परस्याविन्दस्यादेरकारस्य "उदात्तादनुदात्तस्य ।८।४।६६।" इति स्वरितत्वे कार्य्यकालपक्षे "स्वरितात् । १।२।३९।" इत्येकश्रुतिः ।

९—आ । आ । इति "निपाता आद्युदात्ताः फि० सू० ८०।" इत्याद्युदात्तोऽव्ययस्तस्मादम्विभक्तेः "अव्ययादाप् सुपः ।२।४।८२। इति लुक् ।

१०—यच्छब्दः । "फिषोऽन्त उदात्तः ।१। फि० सू० । इत्यन्तोदात्तः तस्य प्रातिपदिकसंज्ञायाममि "त्यदादीनामः ।७।२।१०२।" इत्यत्वे पररूपे 'अनुदात्तौ सुप्पितौ ।३।१।४।" इति विभक्त्यकारानुदात्तः पूर्वरूपेऽप्यादेशः "एकादेश उदात्तेनोदात्तः ।८।२।५।" इत्येकादिष्टाकार उदात्तः ।

११—नक्षत्रम् । क्षदधातोर्वा क्षर्धातोरौणादिकष्ट्रन्प्रत्ययः क्षत्रमिति । धातोः ।६।१।१६२। इति क्षकारोत्तरवर्त्यकार उदात्तः, आद्युदात्तश्च ।३।१।३। इति त्रघटकाकार उदात्तः ततः "अनुदात्तं पदमेकवर्जम् , ६।१।१५८।" इति क्षघटकाकारोऽनुदात्तः । ततः प्रातिपदिकत्वेन

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वन्तत्त्रशब्देन सह "निपाता आद्युदात्ताः । फि० सू० ८०।" आद्युदात्तनन्निपातः "नञ् । २।२।६। समस्येत "नलोपो नञः ।६।३।७३।" इति नलोपे-प्राप्ते "नभ्राएनपान्न ०।६।३।७५।" इति निषेधे "समासस्य ।६।१।२२३।" अन्तोदात्तत्वे प्राप्ते "अव्यये नञ्कुनिपातानामिति" वार्तिकसहकृतेन "तत्पुरुषे तुल्यार्थः ।६।२।२।" इति सूत्रेण पूर्वपदप्रकृतिस्वरे "उदात्तादनुदात्तस्य स्वरितः ।८।४।६६।" इति नकाराकारे स्वरिते अम् विभक्त्या सहैकादिष्टोदात्ताकारः त्रघटकः "अनुदात्तं पदमेकवर्जम् ।६।१।१५८।" इत्यनुदात्तः । नन्वनुदात्तं पदमेकवर्जमिति सपादसप्ताध्यायीस्थत्वष्ठ्या त्रिपादीस्थोदात्तादनुदात्तस्येत्यसिद्धत्वान्न त्रघटकाकारोऽनुदात्त इतिचेन्न । संज्ञापरिभाषाविषये कार्य्यकालपक्षस्याप्यभ्युपगमात् । न च सन्निपातलक्षणपरिभाषया निषेध इति वाच्यम् । अस्याः परिभाषाया अनित्यत्वात् ।

१२—ददृशे—दृश् धातोर्लिटि "व्यत्ययो बहुलम् ।३।१।८५।" इति पदवचनयोर्व्यत्यासेन तप्रत्यये एशादेशे छन्दसि सर्वविधीनां वैकल्पिकत्वेनार्धधातुकसंज्ञाया अभावे सार्वधातुकसंज्ञायाम् "अभ्यस्तानामादिः ।६।१।१८९।" इति धातुस्वरं बाधित्वाद्युदात्तत्वे "उदात्तादनुदात्तस्य स्वरितः ८।४।६६। इति ऋकारः स्वरितः । एकारः प्रत्ययस्वरेणाद्युदात्तः ।

१३—दिवो । दिवेर्डिविः । इति दिव्धातोरौणादिके डिविप्रत्यये टेर्लोपे प्रत्ययस्वरेण दिवघटक इकार उदात्तः । ततः सप्तम्यर्थे ङसि "अनुदात्तौ सुप्पितौ ।३।१।४।" इत्यनुदात्तस्याकारस्य "सावेकाचस्तृतीयादिर्विभक्तिः ।६।१।१६८।" इति विभक्तेराद्युदात्तत्वे अनुदात्तं पदमेकवर्जम् ।६।१।१५८। इतीकारोऽनुदात्तः, सस्य रुत्वे उत्वे गुणे दिवो—इति ।

१४—न, न, ह, पुनरेते । "निपाता आद्युदात्ताः । फि० सू० ८० सूत्रेणाद्यदात्ताः । किन्तु पुनःशब्दे तदनन्तरं "अनुदात्तं पदमेकवर्जम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

।६।१।१५८।” इति पुनःशब्दघटकनकारोत्तरवर्त्यकारोऽनुदात्तः तत "उदात्तादनुदात्तस्य स्वरितः ।८।४।६६।” इति स्वरितः ।

१७—यतो । यच्छब्दः "फिषोऽन्त उदात्तः । फि० सू० ।१।” इत्यन्तोदात्तः ततः तसिल्प्रत्ययस्वरेणाद्युदात्तः "अनुदात्तं पदमेकवर्जम ।६।१।१५८।” इति यकाराकारोऽनुदात्तः ।

१८—किरद् । कॄविक्षेपे इत्यस्माद् लेटि तिपि शप्रत्यये इत्वे रपरत्वे "इतश्च लोपः परस्मैपदेषु ।३।४।९७।” इति प्रत्ययेकारलोपे "आद्युदात्तश्च ।३।१।३।” शकाराऽकारानुदात्तः "धातोः ६।१।१६२।” इति धातोरिकार उदात्तः । तिङ्ङतिङः ।८।१।२८।” इति नरूपपदात् परस्य किरदित्यस्यानुदात्तत्वे "उदात्तादनुदात्तस्य स्वरितः ।८।४।६६। इतीकारः स्वरितः ।

१९—'ह'

२० – अनुवेद । अन्विति उपसर्गाश्चाभिवर्जमित्यस्य बाहुलकाद्-प्रवृत्त्या "फि० सू० फिषोऽन्तः १।” इत्यन्तोदात्तः । इघटकाकारेण सहैकादेशे आ इत्युदात्तः । विद् ज्ञाने धातोर्व्यत्ययेन लटि तिपि "विदो लटो वा ।३।४।८३।” तिपो णलि "धातोः ।६।१।१६२।” इत्यन्तोदात्तः । तिपः पित्त्वात्स्थानिकस्य णलोऽकारः "अनुदात्तौ सुप्पितौ ।३।१।४।” इत्यनुदात्तः स "उदात्तादनुदात्तस्य स्वरितः ।८।४।६६।” इति स्वरितः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

छान्दोग्योपनिषदि:—

"अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्य्यमेव तत्। तद् अरश्च ह वै एयश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि । तदैरं मदीयँ सरस्तदश्वत्थः सोमसवनः। तदपराजिता पूर्ब्रह्मणः। प्रभुविमितँ हिरण्मयम् ॥ ३ ॥ तद् य एवैतावरञ्च एयञ्चार्णवौ ब्रह्मलोके ब्रह्मचर्य्येणानुविन्दति तेषामेवैष ब्रह्मलोकस्तेषाँ सर्वेषु लोकेषु कामचारो भवति ॥४॥ (छा० अ० ८ खं ५)

अथेति ॥ (अथ) अथात्रानन्तर्य्ये विद्यते। अतो ब्रह्मचर्य्येणात्मलाभकथनादनन्तर परमकारणस्वरूपस्य परमात्मनस्तत्प्रापकाचार्य्यस्य च स्वरूपं निवासस्थानञ्च निदर्शयन्ति वेदाः (यदरण्यायनमित्याचक्षते) अत्र अतिप्रसिद्धार्थकप्रकाशपदार्थेऽत्रेति शब्दो विद्यते। "इति प्रकरणे हेतौ प्रकाशादिसमाप्तिषु । निदर्शने प्रकाशे स्यादनुकर्षे च सम्मतम्" "प्रकाशाऽतिप्रसिद्धे स्यात्महासातपयोः स्फुटे" । इति विश्वकोषवचनाभ्याम् । तथा च—ब्रह्मर्षिपरमभक्तेषु ब्रह्मर्षिपरमभक्तैर्वा "इति" नाम प्रकाशः = अतिप्रसिद्धम् (यत्-अरण्यायनम्) अश्च अश्च अश्चेत्याः तेषाम् आनाम् = व्यूहादित्रिवासुदेवानां कारणम् = अकारणम्, तच्चासौ रश्चेति अरः "शाकपार्थिवादीनां सिद्धये मध्यमपदलोपो वक्तव्यः।" इति कारणपदस्य लोपो वेदितव्यः। अथवा—व्यूहादित्रिवासुदेवान् सृष्ट्यादौ रचयति प्रलयदशायाम् राति गृह्णातीति रः "अन्येभ्योऽपि दृश्यते" (पा० ३।२।१०१) इत्यत्र अपि शब्दः सर्वोपाधिव्यभिचारार्थः तेन धात्वन्तरादपि कारकान्तरेष्वपि क्वचित्" इति नियमात् "रच प्रतियत्ने। रा दाने" इत्याभ्यां डे प्रत्यये कृते सिद्धेन र इति पदेन परात्परवासुदेवाख्यः श्रीराम उच्यते। तथात्र एषां र इति अरः। "वासुदेवादिमूर्त्तीनां चतुर्णां कारणम्परम्" इति २ पा. ७ अ. बृहद्ब्रह्मसंहितावचनात्। अरश्च एयश्चेत्यरण्यौ रामसीते तयोरयनं गेहं निवास-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्थानम् (आचक्षते) वेदाः कथयन्ति, (ब्रह्मचर्य्यमेव तत्) "तत्" श्रुतिस्मृतिष्विति प्रसिद्धम्, रामसीतयोर्निवासस्थानम्, ब्रह्मचर्य्यमेव, श्रुतिस्मृतिषु प्रसिद्धेनाष्टविधब्रह्मचर्य्येणैव लभ्यमस्तीति वेदाः कथयन्ति। न तु तद्विरहितैस्तत् पदं लभ्यमस्तीत्येवकारेण ध्वनितम् श्रीमद्भिर्वेदैरिति वेदितव्यम्। अर्थाद् ब्रह्मचर्य्यव्रतपालनपरायणानां मुख्यं कर्तव्यं वेदाध्ययनम्। ब्रह्मणा वेदेन (वेदज्ञानेन) तपसा वा चर्य्यम् = लभ्यम् तदरण्यायनम् "ब्रह्म तत्त्वं तपो वेदे न द्वयोः पुंसि वेधसि ॥ ऋत्विग् योगभिदा विप्रे" इति मेदिनी। "वेदास्तत्त्वं तपो ब्रह्म ब्रह्मा विप्रः प्रजापतिः" इत्यमरः। "गद-मद-चर-यमश्चानुपसर्गे (३-१-१००) इति चर गतौ (भ्वा० प० से०) इत्यस्माद् यति कृते 'चर्य्यम्' सिद्धम्। मातापितृसहस्रेभ्योऽप्यधिकवत्सलतरा विधिपूर्वकमधीतास्ते वेदाः स्वाध्येतॄन् अनाद्यविद्यया सञ्चितपुण्यपापरूपकर्मप्रवाहहेतुकब्रह्मादिसुरनरतिर्य्यक्स्थावरात्मकचतुर्विधदेहप्रवेशकृततत्तदभिमानजनितवर्जनीयभवभयविध्वंसनाय प्रथमं स्ववर्णाश्रमोचित-भगवदाराधनरूप-वेदविहितधर्मानुष्ठानैः देहातिरिक्तात्मस्वरूप-तत्स्वभाव-तदन्तर्यामिपरमात्मस्वरूप-तत्स्वभाव-तत्फलभूतात्मस्वरूपाविर्भावपूर्वकानवधिकातिशयानन्दपरब्रह्मस्वरूपरूप-तद्गुणविभवस्थानादीन्यनुभावयितुं स्वार्थान् प्रदर्शयन्ति। ते च तथानुष्ठाय स्वस्वरूपज्ञानाविर्भावपूर्वकपरस्वरूपरूपतद्गुणविभवस्थानादीनिहैवानुभूय, तद्गन्तुमाप्रयाणात् प्रयतन्ते। प्रारब्धक्षयान्ते तत्पदं गच्छन्तीति ब्रह्मचर्य्यपदेन ध्वनितं वेदितव्यम्। "अथ यदरण्यायनमित्याचक्षते ब्रह्मचर्य्यमेव तत्" इमं मन्त्रभागं स्पष्टयितुं स्वयं भगवान् वेदोऽग्रिममन्त्रद्वयमारभते--(अरश्च ह वै ण्यश्चार्णवौ।) प्रतिसञ्चर अविद्यापादस्थाः सर्वे भूतवर्गाः अमन्ति यस्मिन्निति 'अः' नारायणाख्यो वासुदेवः। आनन्दपादस्थाः सर्वे पञ्चोपनिषद्वर्गाः अमन्ति यस्मिन्निति "अः" परवासुदेवः। अश्च अश्च अश्चेति 'अः' व्यूहवासुदेवनारायणाख्यवासुदेवपरवासुदेवास्तैरीयते गम्यते प्राप्यते न्युष्यते वेति "रः" अथवा व्यूहवासुदेवादीन् रचयति महाप्रलये राति गृह्णातीति 'रः' परात्परवासुदेवः श्रीरामः। अत्रार्थे "वासुदेवादिमूर्तीनां

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चतुर्णां कारणम्परम् । चतुर्विंशतिमूर्त्तीनामाश्रयः शरणम्मम" बृहद्-ब्रह्म संहितायाः २ पा. ७ अध्यायस्थवचनम् । "दुःखमात्रोत्पादकं यत् सदसत्कर्म तद्रहितम् उच्चैः स्थितमेकं ज्योतिर्लोकान् सप्त निगीर्योद्गीर्णंवन्तं मोहहेत्वाकर्षणकर्त्तृ कयमभटानां क्रूरविषमच्युतं दशरथस्य सुतं तं विनान्यशरणवान्नास्मि" सहस्रगीतिकाचार्य्यवचनञ्च बीजं वेदितव्यम् । "क्षि निवासगत्योः" क्षयति निवसति अस्मिन्निति क्षयः' क्षीयते गम्यते प्राप्यते वा क्षयः तस्मिन् क्षयेऽर्थे विद्यमानात् 'रीङ्' धातोरौणादिकेऽचि कृते अथवा "अन्येष्वपि दृश्यते" (पा० ३।२।१०१) इति ड प्रत्यये कृते 'रः' इति निष्पन्नं पदं । "रश्च रामेऽनिले वह्नौ भूमावपि धनेऽपि च। इन्द्रियेन्धनरोगे च भूने रश्च प्रकीर्तितः" "अकारो वासुदेवः स्यात्" इत्येकाक्षरीकोषौ उक्तार्थं पोषयतः । 'आनाम् अकारवाच्यानाम् व्यूहवासुदेव-नारायणाख्यवासुदेव-परवासुदेवानाम् 'रः' लयस्थानम् प्राप्यः स्वस्वरूपतो रचयिता उत्पादयिता वा 'अरः' परात्परवासुदेवः श्रीरामः । तं णयति=नयति प्रापयति यः सीतारूपाचार्य्यः स णयः । 'णीञ् प्रापणे" इत्यस्मात्कर्त्तरि क्विप् । नत्वाभावश्छान्दसः । क्विप् सर्वापहारे णीरिति सिद्धम् । ततश्च "चातुर्वर्ण्यादानामुपसंख्यानम्" इति स्वार्थे ष्यञ्‌ "यस्येति च" इतीवर्णलोपे 'णय' इति सिद्धम् । पुंस्त्वन्तु छान्दसम् । ततः अरश्च णयश्चेत्यर्णवौ रामसीते । "पृषोदरादीनि यथोपदिष्टम्" इत्यरस्य 'अर्' णयस्य णवादेशे "अर्णवौ" इति सिद्धम् । तद्वाच्ये रामसीते । तयोरयनम् "ह" "वै" इति निश्चयेन "ब्रह्मलोके" त्रिपाद् विभूतौ विद्यते । तच्च ब्रह्मलोके कुत्रास्तीत्याह स्वयं भगवान् वेदः (तृतीयस्यामितो दिवीति) इतो नाम त्रिपाद्विभूतिषु या प्रथमपाद्विभूतिस्तस्या अधोभागे विद्यमानः पद्मनाभाख्यो विष्णुर्ब्रह्माणं वेदान् पाठयन्नुवास "इतः" अस्मात्स्थानात् "यो वै ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै" इति श्रुतेः । अर्थात् समस्तवेदानामुपदेष्टा भगवान् पद्मनाभाख्यो विष्णुः श्रोता चतुर्मुखब्रह्मा । तथा यत्र स्थाने भगवान् पद्मनाभाख्यो विष्णुः स्थितः सन् सर्वान् वेदान् तस्मै ब्रह्मणे प्रहिणोति प्रापयति तस्मात्स्थानादुपरि या

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तृतीया द्यौः तस्यां तृतीयस्यां दिवि रामसीतयोरयनं गेहम् "अयनं पथि गेहेऽर्कस्योदग्दक्षिणतो गतौ" (इति हैमात्) विद्यते । अर्थात् त्रिपाद्विभूतौ या प्रथमा द्यौर्द्योतनात्मको भागः स सुविद्यापादः, या द्वितीया द्यौर्द्योतनात्मको द्वितीयो भागः स आनन्दपादः, या तृतीया द्यौर्द्योतनात्मकस्तृतीयो भागः स तुरीयपादः, तत्र तृतीयस्यां दिवि परब्रह्मणः श्रीरामस्यायनं वर्त्तते । अयोध्याख्यो लोकः परब्रह्मणो लोकः ब्रह्मलोकः "विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः" इति परपदस्य लोपे। भगवान् वेद इममेव परब्रह्मलोकं परिचाययति-तदैरमित्यादिना । तन्नाम तत्र परब्रह्मलोके 'ऐरम्' नाम इरया उत्तमोत्तमसुवासिताद्भिर्युक्तम् 'सरः' प्रफुल्लितपद्मगन्धयुक्तस्तड़ाग इत्यर्थः । तत्कथम्भूतम् (मदीयम्) मदयतीति 'मदीयम्' स्नानपानाभ्यां हर्षवर्द्धकम् "मदि हर्षे" इति स्मरणात् पुनस्तत्र ब्रह्मलोके (सोमसवनः अश्वत्थः) विद्यते । सोमममृतं सुनोति स्रवति इति सोमसवनः अश्वत्थः। पार्श्वोर्ध्वसीमाशून्यायां तृतीयस्यान्दिवि विद्यमानायां पूर्वोक्तविशेषणविशिष्टायां यस्यां पुर्य्यां सोऽयं परब्रह्म परात्परवासुदेवः श्रीरामो विराजते तां पुरीं परिचाययति वेदः । (तदपराजिता पूर्ब्रह्मणः) परब्रह्मणः श्रीरामस्य अपराजिता नाम्नी सा पूः । अर्थादपराजितापर्यायायोध्यानाम्नी पुरी परब्रह्मणः श्रीरामस्यास्ति । तथा चोक्तम्-अथर्ववेदे १० म काण्डे १ प्रथमानुवाके:—

"अष्टाचक्रा नवद्वारा देवानां पूरयोध्या ।
तस्यां हिरण्मयः कोशः स्वर्गो ज्योतिषावृतः ॥३१॥
तस्मिन् हिरण्मये कोशे त्र्यरे त्रिप्रतिष्ठिते ।
तस्मिन् यत्पक्षमात्मन्वत्तदेव ब्रह्मविदो विदुः ॥३२॥
प्रभ्राजमानां हरिणीं यशसा संपरिवृताम् ।
पुरं हिरण्मयीं ब्रह्माऽऽविवेशाऽपराजिताम् ॥३३॥इति"

"विवेशापराजिताम्" इत्यस्यैवोपबृंहणम् "विवेश वैष्णवं धाम सशरीरः सहानुजः" (वा० रा० उ० १२ श्लो०) इत्यादिरामायणीयचरितं च सम्प्रदायज्ञैरेव विद्वद्भिर्वेदितव्यम् । अत्रापराजितापदम् श्रीविष्णुसहस्रनामव्याख्यातृभिः श्रीपराशरभट्टस्वामिभिः—

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

आज्ञानुग्रहभीमकोमलपुरीपालाफलं भेजुषां
"याऽयोध्येत्यपराजितेति विदिता नाकं परेण स्थिता"
भावैरद्भुतभोगभूमगहनैः सान्द्रा, सुधास्यन्दिभिः
श्रीरङ्गेश्वरगेहलक्ष्मि ! युवयोस्तां राजधानीं विदुः ॥२३॥

इत्यादिभिः श्रीगुणरत्नकोशे निवद्धतया अपराजितापदार्थस्य अयोध्यापदार्थत्वेन वेदविदितत्वम् प्रस्फोटितम् त्रिपाद्विभूतेरुपरि भागे स्थितत्वंच निर्दिष्टं । यत्राऽयोध्यायाम् (प्रभुर्विमित हिरण्मयम्) प्रभुना श्रीरामेण विमितं विशेषेणाधिष्ठितं स्वर्णमयमण्डपं सिंहासनं वा विद्यते। अयमेव लोको ब्रह्मचर्य्यनिष्ठैर्विरक्तैः प्राप्यो भवति इति वेदितव्यम्। उक्तं चार्य्यैः—

"सत्सङ्गाद्भवनिष्पृहे गुरुमुखाच्छ्रीशं प्रपद्यात्मवान्
प्रारब्धं परिभुज्य कर्मसकलं प्रक्षीणकर्मान्तरः।
न्यासादेव निरङ्कुशेश्वरदया-निर्मूलमायान्वये
हार्दानुग्रहलब्धमध्यधमनीद्वाराद् बहिर्निर्गतः ॥ ९ ॥
मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दवातांशुमद्
ग्लौविद्युद्वरुणेन्द्रधातृमहितः सीमान्तसिन्ध्वाप्लुतः।
श्रीवैकुण्ठमुपेत्य नित्यमजडं तस्मिन् परब्रह्मणः
सायुज्यं समवाप्य नन्दति समं तेनैव धन्यः पुमान् ॥१०॥

इत्युक्तप्रकारेणानुसन्धेया, इत्यत आह "तद्य" इति ये जना ब्रह्मचर्य्येण युक्ताः सन्तः परब्रह्मलोके पूर्वोक्तमन्त्रस्यार्थभूते अपराजिताख्ये अयोध्यानामके नगरे यत् हिरण्मयं मण्डपं सिंहासनं वा 'तत्' नाम तस्मिन् मण्डपे सिंहासने वाऽधिष्ठितौ एतौ 'अरश्च' 'ण्यश्च' सीतारूपाचार्य्यश्च अर्णवौ रामसीते "अनुविन्दन्ति" गुरूपदिष्टमार्गेणानुध्यायन्तः सन्तः पश्चात् शरीरावसाने लभन्ते । (तेषामेवैष ब्रह्मलोकः) अपराजिताख्यः परब्रह्मलोकः अयोध्यानामलोकः प्राप्यो भवति नान्येषाम् । (तेषां सर्वेषु लोकेषु कामचारो भवति) नान्येषामिति भावार्थः ।

"तदपराजिता पूर्ब्रह्मणः" अत्र केनचित् ब्रह्मणः हिरण्यगर्भस्य पूरित्यर्थो वर्णितः, स न समीचीनः । अत्र श्रुतौ "तृतीयस्यामितो दिवि"

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

इत्युक्तत्वात्कथमपि हिरण्यगर्भस्य पुरः तृतीयत्वं साधयितुं न शक्यते ।

"पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ।
त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहा भवत्पुनः ॥"

अस्याः श्रुतेर्भाष्ये सर्वैर्भाष्यकारैर्भगवतो लीलाविभूतिः त्रिपाद्विभूतिश्च वर्णिता, तस्यास्त्रिपाद्विभूतेः क्रमशः प्रथमत्वं द्वितीयत्वं तृतीयत्वञ्च न्यायतो वक्तुं शक्यते, अत एव भगवता वेदेन यस्य तृतीयत्वं भवितुमर्हति तस्यैव "तृतीयस्यामितो दिवि" इत्यनेन निदर्शनं कृतम् । तत्रैव अपराजिता नाम्नी पुरी निदर्शिता इति स्पष्टं विभावयन्तु सुधियः ।

केनचित्तु "अर्णवौ" नाम समुद्रद्वयं तत्र विद्यते इति निगदितम्, तदपि न समीचीनम् "अरश्च ह वै ण्यश्च" इति यथाश्रुति समासविग्रह-प्रदर्शनोत्तरश्रूयमाणार्णवपदं पूर्वप्रदर्शितविग्रहसिद्धं प्रतिभाति । यथा "धवश्च खदिरश्च धवखदिरौ" इत्यत्र समासवृत्त्या धवनामकं भिन्नं वस्तु खदिरनामकं च भिन्नं वस्तु प्रतीयते ।

'घटश्च घटश्चेति 'घटौ इत्यत्र सजातीयघटद्वयं प्रतीयते एवं कथमपि 'अरश्च ण्यश्च अर्णवौ' इत्यत्र समुद्रद्वयस्य प्रतीतिर्भवितुं नार्हतीति सहृदयैर्विभाव्यम् । प्रयोगसाधनप्रक्रिया तु पूर्वं प्रदर्शिता । अतएव 'यदरण्यायन-मित्याचक्षते ब्रह्मचर्य्यमेव तत्' इत्यत्र अरश्च ण्यश्चेत्यर्णवौ सातारामौ तयोरयनम् अपराजिता तद् ब्रह्मचर्य्यमेव श्रुतिस्मृतिसूक्ताष्टविधलक्षणेन ब्रह्मचर्येण प्राप्यमेव । अर्थादष्टाविधब्रह्मचर्य्यवता नैष्ठिकब्रह्मचारिपुरुषेण प्राप्यम् तत्स्थानं नत्वन्यैरित्येवकारेण प्रदर्शितम् । तत्र गतो मुक्तः सर्वत्र त्रिपाद्विभूतौ लीलाविभूतौ च यथेष्ट विहरति नत्वन्यत्र गतो मुक्तः तथाभिधानादिति स्वरसो वेदितव्यो वेदस्यति दिक् ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुनरन्येऽपि कतिचिन्मन्त्रा रामपरकाः

तत्र ऋग्वेदीय 'प्रतद्' इति मन्त्रस्य रामप्रतिपादकत्वं निदर्शयितुं प्रथमं सायणभाष्यसहितस्तन्मन्त्र उद्धृयते। तथाहि:—

प्र तद् दुःशीमे पृथवाने वेने प्र रामेऽवोचमसुरे मघवत्सु।
ये युक्त्वाय पञ्च शता स्मयु पथा विश्राव्येषाम् ॥१४॥

ऋग्वेदे अ० ८, ४, व २६, मन्त्र, १४

अथ सायणभाष्यम्:—

(ये) देवाः (पञ्च शता) शतानि रथान् (युक्त्वाय) अश्वैर्युक्त्वा अस्मयु अस्मत्कामाः सन्तः (पथा) यज्ञमार्गेण गच्छन्ति तेषाम् (एषाम्) देवानाम् (विश्रावि) देवानां लोके वा विशेषेण श्रावकगुणयुक्तं (तत्) स्तोत्रम् (दुःशीमे) दुःशीमनाम्नि (पृथवाने) पृथवानः पृथिः। तस्मिन् (वेने) च (असुरे) बलवति (रामे) चैतेषु राजसु (प्र) वोचं) प्रब्रवीमि। प्रख्यापयामीत्यर्थः। (मघवत्सु) अन्येषु धनवत्सु च प्रख्यापयामीत्यर्थः॥ १४॥

अस्य मन्त्रस्य व्याख्यायां श्रीमता सायणाचार्य्येण निगूढवेदार्थं न सम्यक् प्रकटितं तथापि किञ्चिदिङ्गितमकार्षीत्। तत्सहृदयैर्विद्वद्भिरेव ज्ञातुं शक्यते। "वेदवेद्ये परे पुंसि जाते दशरथात्मजे। वेदः प्राचेतसादासीत्साक्षाद्रामायणात्मना" "वेदैश्च सर्वैरहमेव वेद्यः" इति सर्वमान्यतमवचनाभ्यां निखिलवेदवेद्यत्वं रामापरपर्य्यायकृष्णस्य कृष्णापरपर्य्यायरामस्य प्रस्फुटं विराजते वेदोपबृंहणस्वरूपस्मृतीतिहासपुराणेषु। "बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति। इतिहास-पुराणाभ्यां वेदं समुपबृंहयेत्। इत्युपबृंहणे मानम्। तथाच वेदः साक्षाद्रामायणात्मना प्राचेतसादुपबृंहित आसीत्। उपबृंहणं नाम—विदितसकलवेदतदर्थानां स्वयोगमहिम्ना साक्षात्कृतवेदतत्त्वार्थानां पुलहपुलस्त-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वशिष्ठादीनां ब्रह्मर्षिप्रवराणां वाक्यैः स्वावगतवेदवाक्यानां व्यक्तार्थीकरणम् । अस्य प्रयोजनमपीत्थं वेदितव्यम्:—सकलशाखानुगतस्य वाक्यार्थस्याल्पभागश्रवणाद् दुरवगमत्वेन तेन विना निश्चयाऽयोगादुपबृंहणं ह्यत्यावश्यककार्य्यं भगवदुपासनया साक्षात्कृतपरात्परतत्त्वैर्ब्रह्मर्षिभिः कृतमिति वेदितव्यम् । तत्रोपबृंहणभूतपुराणमूर्धन्ये श्रीमद्भागवते:—

"यस्यामलं नृपसदः सुयशोऽधुनापि गायन्त्यघघ्नमृषयो दिगिभेन्द्रपट्टम् ।
तन्नाकपालवसुपालकिरीटजुष्टं पादाम्बुजं रघुपतेः शरणं प्रपद्ये ॥

इत्युपबृंहितवचनानुगुणमेव किञ्चिदिङ्गितं चतुर्वेदभाष्यकारेण यथा तथा दृश्यतां निर्मत्सरैर्विद्वद्भिः :—"दुःशीमे—" इत्यारभ्य "चैतेषु राजसु" इति पर्य्यन्ते ग्रन्थे चकारद्वयं, तत्रैकेन चकारेण दुःशीमः, पृथवानः, वेनः ऐतान् राज्ञः पृथक् २ निर्दिश्य द्वितीयेन चकारेण "असुरे" बलवतीति विशेषणेन 'रामः' पृथक् निर्दिष्टः । तथाच "असुरे रामे" इत्यत्र "निमित्तात्कर्म्मयोगे सप्तमी" इति सप्तमी । यथा 'दन्तयोर्हन्ति कुञ्जरम्" अत्र कुञ्जररूपकर्म्मणि युक्तौ संयुक्तौ दन्तौ ता एव हनने निमित्तौ, अतः दन्तशब्दात्सा सप्तमी जाता । एवं चात्र स्तोत्ररूपकर्म्मणि प्रतिपाद्यत्वसम्बन्धेन युक्तः 'रामः' एव प्रवचने निमित्तः, अतो रामशब्दात् सप्तमी जाता । "दुःशीमे पृथवाने वेने चैतेषु राजसु मघवत्सु धनवत्सु अन्येषु च रामः "असुरः" बलवान् बलशक्तिसम्पन्न इत्युपलक्षणम् "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुत्या श्रुत्युक्तसमस्तशक्तिसम्पन्नो रामस्तस्मिन्; रामनिमित्तकं विशेषेण श्रावकस्य रामस्य गुणेन युक्तं यद् विश्रावि विशेषेण श्रूयते यद् रामचरितं तद् विश्रावि रामायणात्मकं स्तोत्रम् ऋषयो महर्षयो ब्रह्मर्षयो दुःशीमादिराजसभासु प्रवोचम् प्रावोचन् "व्यत्ययो बहुलम्" (३।१।८५) इति वचनपुरुषव्यत्ययः । अत्रैतदुक्तं भवतिः—"यज्ञेन दानेन तपसा नाशकेन" "यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥ इति श्रुति-स्मृतिभ्यां निर्दिष्टेन स्वरूपावरणकानाद्यविद्यानाशकेन आत्म-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वरूपनिर्मलीकरणशक्तिसम्पन्नेन यज्ञादिकर्मणा विशुद्धान्तःकरणत्वात् साक्षात्कृतस्वपरस्वरूपाः साधकाः स्वपरस्वरूपे क्रीडमानतया देवास्तेषां देवानां लोकः पूरयोध्या तत्र यज्ञदानतपसात्मकमार्गेण साधनेन गच्छन्ति, तत्र गत्वा भगवन्तं श्रावयन्ति भगवद्गुणगणबोधकरामायणात्मकवेद-मन्त्ररूपाणि स्तोत्राणि । अयमर्थः "अष्टाचक्रा नवद्वारा देवानां पूरयोध्या"(१०मकाण्डे १ मानुवाके इत्यादिभिरथर्ववेदैतरेयारण्यकमन्त्रैः प्रतिपादित एव 'देवानां लोके वा विशेषेण श्रावकगुणयुक्तं (तत्) स्तोत्रम्" इत्यनेनेङ्गितः श्रीमता सायणाचार्य्येणेति । अस्य रहस्यार्थत्वान्नहि सुस्पष्टीकृतमिति विशुद्धहृदयै रेव बोद्धव्यमस्ति ।

वेदेषु रहस्यमपि विद्यते, अत्र भगवान् मनुरेव मानम् । तथा च मनुः "उपनीय तु यः शिष्यं वेदमध्यापयेद् द्विजः । सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते ॥...इत्यादि ।" सम्प्रति सकल्पसरहस्यवेदाध्ययना-ध्यापनरीतिरस्मदादीनां भारतीयानां दुर्भाग्यवशात्प्रणष्टा; तथापी-दानीन्तनसमये आचार्य्यपाशः उपनयनसमये पुरोधसा उच्चार्य्य-माणमन्त्रवर्णपदानि उपनीयमानं वटुमुच्चारयति पश्चाद्वटुरपि उच्च-रति । एतादृशेषु शतेषु सहस्रेषु वा वटुषु कश्चिद् यं कं पृष्ट्वा अभ्यस्य प्रतिदिनं यथाशक्ति श्रद्धया जपति शतं सहस्रं वा गायत्रीमन्त्रं तत्पश्चाद-न्नादिकं गृह्णाति । एवं बहुवर्षपर्य्यन्तं ब्रह्मचारी भूत्वा आहारसंशो-धनपूर्वकं हविष्याशीर्वेदमातरं गायत्रीं विद्यामभ्यस्यति । तस्य हृदि वेद-वेदार्थबोधकप्रकाशं क्रमशो विस्तारयति वेदमाता गायत्रीनाम्नी पराविद्या सीतारूपा । जपयज्ञेन यथायथं पापानि विनश्यन्ति तथातथं ज्ञानदीपो हृदि प्रज्वलितो भवति तेन याथातथ्यं सर्वं वस्तुमात्रं विज्ञातुं शक्नोतीति मे विश्वासः । अनयैव रीत्या मया किञ्चित्प्रकाशकरज्ञान-दीपो लब्धस्तेन यद् यथादृष्टं तत्तथा लिखितं स्वसन्तोषार्थं न तु केषाञ्चित्प्रबोधाय । अतः परं विरमामि ।

अथातः परमपि किञ्चिद् विवक्षामि तदित्थम्—(वेने) च (असुरे) बलवति (रामे) अत्र रामात्पूर्वम् 'वेने' इत्यस्यैव असुर-विशेषणत्वे कृते सुशोभना व्याख्या मया प्रतीयते । उपबृंहणभूतपुराण-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मूर्धन्ये श्रीभागवते वेनस्यासुरत्ववर्णनात् । एवं कृते ,सति अधोलिखितमत्कृतव्याख्याया अपि नहि काचित् क्षतिः स्यात् । तथा हि:—

प्र तद् दुःशीमे पृथवाने वेने प्र रामेऽवोचमसुरे मघवत्सु।
ये युक्त्वाय पञ्च शता स्मयु पथा विश्राव्येषाम् ॥

पदच्छेदः—प्र तत्, दुःशीमे, पृथवाने, वेने, प्र, रामे, अवोचम्, असुरे, मघवत्सु, ये, युक्त्वाय, पञ्च, शता, स्मयु, पथा, विश्रावि, एषाम्। वाक्ययोजना—(मघवत्सु) महन्ति संसारमुमुक्षया भगवन्तं पूजयन्तीति मघवन्तः तेषु(ये) भगवदुपासकाः (पथा) भगवत्प्रापकार्चिरादिमार्गेण (दुःशीमे) सीमाशून्यत्रिपाद्विभूतौ गत्वेति शेषः (पञ्चशता) "तं पञ्चशतान्यप्सरसः प्रतिधावन्ति शतं मालाहस्ताः शतमाञ्जनहस्ताः शतं चूर्णहस्ताः शतं वासोहस्ताः शतं कणाहस्तास्तं ब्रह्मालङ्कारेणालङ्कुर्वन्ति" (कौषित्कीब्राह्मणोपनिषदि प्र० अ० ४ मं०) इति श्रुतेः पञ्चशताप्सरोभिः सत्कृताः सन्तः (असुरे) असून् प्राणान् राति ददातीत्यसुरः तस्मिन् । अर्थात् "एषोऽणुरात्मा चेतसा वेदितव्यः । यस्मिन् प्राणः पञ्चधा संविवेश"। (तृ० मु० प्र०- खं० ६ मं०) इति श्रुतेः सृष्ट्यादौ करुणया सकलजीवेषु प्राणान् सन्निवेश्य स्वस्वकर्मफलं भोजयितुं नियोजयति यः परमात्मा तस्मिन् । अथवा असुषु प्राणेषु रमते यः स असुरः अन्तर्यामी यः प्राणे तिष्ठन् प्राणादन्तरो वा यं प्राणो न वेद यस्य प्राणः शरीरं यः प्राणमन्तरो यमत्येष त आत्मान्तर्य्याम्यमृतः ॥ १६ ॥ (बृ०- उ० ३ अ० ७ ब्रा०) इति श्रुतेः, तस्मिन् (रामे) "अन्तर्बहिश्च यत्सर्वं व्याप्तः सन् रमते हि यः । स राम इति वै श्रुत्या मुनिभिश्च निबोधितः ॥" इति निर्वचनात् "रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते" ॥ ६ ॥ (रा० ता० उ०) इति श्रुतेश्च रामाख्ये परब्रह्मणि (युक्त्वाय) मनो नियोज्य (स्मयु) स्मयत्यनेनेति 'स्मयु' "ष्मिङ् ईषद्धसने" इति धातुस्मरणात् ईषद्धासकारकं (विश्रावि) विशेषेण श्राव्यत इति 'विश्रावि' श्रोतृनानागुणद्योतकं स्तोत्रं

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कृत्वेति शेषः (प्रवेने) सम्भक्तिमकार्षुः। "बल सम्भक्तौ" इति धातुस्मरणात्। "ष्टनवनशब्दे" इतिस्मरणाच्च स्तोत्रमपाठिषुः। अत्र पक्षे कृत्वेति नाध्याहर्त्तव्यम्। भक्तिस्तु पूज्येष्वनुरागरूपा सम्यगनुरागः सम्भक्तिः। सम्यक्त्वञ्चानुरागबाहुल्याद् ध्येयेन सह योजयित्रीत्वं भक्तौ विद्यते इति श्रुत्यन्तरे प्रसिद्धम्। तथा च सायुज्यमुक्तिं प्राप्सुरित्यर्थः। (एषाम्) सायुज्यमुक्तिं प्राप्तानां जीवानां श्रुत्यन्तरे प्रसिद्धो (य) यः पन्था (तत्) तेन पथा। अर्थात् श्रुत्यन्तरे प्रसिद्धेनानुसन्धानमार्गेण (पृथवाने) पर्थयन्ति प्रत्तिपन्ति यस्मिन् लीलामण्डले तत् 'पृथवानं' लीलामण्डलं प्राकृतमण्डलमित्यर्थः तस्मिन्। 'पृथु पक्षे' इति धातुस्मरणात्। पूर्वोक्तासुरे प्राणपदे प्राणनियामके सकलान्तरात्मनि रामे मनो युक्त्वा "स्मयु" ईषद्धासकारकं, "विश्रावि" श्रोतुः परब्रह्मणः श्रीरामस्य नानागुणबोधकं स्तोत्रं (प्रावोचम्) प्रापाठिषम् अहमितिशेषः। अतोऽहमपि भगवत्सायुज्यं प्राप्स्यामीति दृढविश्वासवतो भगवद्धामप्राप्तिरिति ध्वनयति श्रुतिरिति फलितार्थो बोद्धव्यः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ 'प्र तद्' मन्त्रे स्वरसंचारः

१—प्र । उपसर्गाश्चाभिवर्जम्। फि० सू० ८१ । सूत्रेणाद्युदात्तः ।

२— तद् । तच्छब्दः फिषोऽन्त उदात्तः। फि० सू० १। सूत्रेणान्तोदात्तः।

३—दुःशीमे । दुरिति निपातः "चादयोऽनुदात्ताः। फि० सू० ८४। इत्यनुदात्तः। अन्तोदात्तशीङ्धातोरौणादिकः क्मप् प्रत्ययः। पित्वात् "अनुदात्तौ सुप्पितौ। ३।१।४। इत्यनुदात्तः ततो बहुव्रीहौ" बहुव्रीहौ प्रकृत्या पूर्वपदम्।६।१।१। इति पूर्वपदप्रकृतिस्वरः।

४—पृथवाने। पृथु प्रक्षेपे—इत्यस्मादौणादिके शानचि-अवुगागमे पृथवान इति "उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति पक्षे "वृषादीनाञ्च। ६।१।२०३। इत्याद्युदात्तत्वे "अनुदात्तौ सुप्पितौ ३।१।४। इत्यवशिष्टानामनुदात्तत्वे उदात्तादनुदात्तस्य स्वरितः।८।४ ६३। इति थकाराकारः स्वरितः। ततः परयोर्द्वयोः स्वरितात् संहितायामनुदात्तानाम्।१।२।३६। इत्येकश्रुतिस्वरः।

५—वेने। वन सम्भक्तौ धातोः "व्यत्ययो बहुलम्। ३।१।८५ इति व्यत्ययेन लिटि तप्रत्यये—एशादेशे वनित्यस्य द्वित्वे—एत्वेऽभ्यासलोपे च धातोः।६।१।१६२। वेघटकैकार उदात्तः प्रत्ययस्वरेण प्रत्ययैकार उदात्तः ततः "अनुदात्तं पदमेकवर्जम्।६।१।१५८। इति धात्वेकारोऽनुदात्तः।

६—प्र। प्रेति उपसर्गस्थस्वरेणाद्युदात्तः

७—रामे। रमन्ते योगिनो यस्मिन्निति घञन्तो रामशब्दो बाहुलकादुञ्छादिषु पठितः "उञ्छादीनाञ्च।६।१।१६०।" इत्यन्तोदात्तः, ततोऽनुदात्तं पदमेकवर्जमित्यनुदात्तो राघटकाकारः।

८—अवोचम्। ब्रूञ् व्यक्तायां वाचि, धातोर्लुङि मिप्यमादेशे

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ब्रुवो वचिः", इति वच्यादेशे च्लौ "अस्यति वक्ति-३।१।५२। इत्यङादेशे वच उम् ।७।४।२०। इत्युमागमे गुणे धातो ६।१।१६२। इत्यन्तोदात्तः अनुदात्तौ।३।१।४। इति पितृस्वरेणामोऽकारोऽनुदात्तः। रामेघटकैकारात् परस्याकारस्य "एङः पदान्तादति।६।१।१०९।इतिपूर्वरूपे तिङ्ङतिङः ८।१।२८।" इति वोचमित्यनुदात्तः।ततः—"उदात्तादनुदात्तस्य स्वरितः। ८।४।६६।" इत्योकारः स्वरितः।

९—असुरे। असु क्षेपणे (दि० प० से०) अस्यन्ते, अस्यन्ति वा अस दीप्तौ (भ्वा० उ० से०) अस्यत एभिर्वेति विग्रहे। शॄस्वृस्निहि (उ० सू० १।१०। इत्युः प्रत्ययः। धातोः। ६।१।१६२ इति धात्वकार उदात्तः।आद्युदात्तश्च।३।१।३।इत्याद्युदात्त उप्रत्ययः।अनुदात्तं पदमेकवर्जम् ।६।१।१५८। इति प्राप्ते वृषादीनां च।६।१।२०३। इत्याकृतिगणत्वादाद्युदात्तत्वेऽन्तोऽनुदात्त उकारः। उदात्तादनुदात्तस्य स्वरितः ८।४।६६। इति स्वरित उकारः। रा दाने (अ० प० अनिट्। असून् रातीति विग्रहे आतोनुपसर्गे कः।३।२।३। इति कप्रत्ययेऽनुबन्धलोपे "आतो लोप इटि च।६।४।६४" इत्युदात्ताकारस्य धातोरवयवस्य लोपे प्रत्ययस्वरेणाद्युदात्ताकारेण मेलने—उपपदसमासे, समासस्य ६।१।२२३। इत्यन्तोदात्तत्वे प्राप्ते, तत्पुरुषे तुल्यार्थः।६।२।२। इति पूर्वपदप्रकृतिस्वर एत्र सप्तम्येकवचनानुदात्तेकारस्य गुणे "एकादेश उदात्ते नोदात्तः।८।२।५। इत्युदात्त एकारः।

१०—मघवत्सु। मघं धनमस्यास्तीति विग्रहे, फिषोऽन्त उदात्तः। फि० सू०१। इत्यन्तोदात्त मघशब्दात् बहुलं छन्दसि।५।२।१२२। सूत्रोपरि पठितेन "छन्दसीवनिपौ च। इति वार्तिकेन वनिपि पित्वादनुदात्तः। एवञ्च मध्योदात्तत्वे-आगन्तावनुदात्तौ "उदात्तादनुदात्तस्य स्वरितः ।८।४।६६।" इति वकारोत्तरवर्त्यकारः स्वरितः ततः सप्तमीबहुवचने सुपि, अनुदात्तौ सुप्पितौ।३।१।४। इति सुघटकोकारोऽनुदात्तः। स्वरितात् संहितायामनुदात्तानाम्।१।२।३९। इत्येकश्रुतिः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

११—ये। अन्तोदात्ताद् यच्छब्दाद् "अनुदात्तौ।३।१।४। इत्यनुदात्ते जसि विभक्त्यादिकार्ये "एकादेश उदात्तेनोदात्तः। ८।२।५।" इत्युदात्तैकारको ये-इति।

१२—युक्त्वाय। धातोः।६।१।१६२। इत्यन्तोदात्तो युज् धातुः। आद्युदात्तश्च।३।१।३। इत्याद्युदात्तः क्त्वा प्रत्ययः ततः, अनुदात्तं पदमेकवर्जम् ।६।१।१५८। इति युघटकोकारोऽनुदात्तः। ततः क्त्वो यक्।७।१।४।" इति यगागमे क्त्वाप्रत्ययस्याद्युदात्तत्वेनागमो यगनुदात्तः।

१३—पञ्च। पञ्चन्—शब्दाज्जसि षट्त्वाज्जसो लुकि वृषादीनाञ्च।६।१।२०३। इत्याद्युदात्तत्वेऽन्तस्वरितः।

१४—शता। शत शब्दाज्जसि "जश्शसोः शिः। ७।१।२०। इति जसः श्यादेशे "शेश्छन्दसि बहुलम् ।६।१।७०।" इति शेर्लुक् "नपुंसकस्य झलचः।७।१।७२। इति नुम् प्रत्ययलक्षणत्वेन फिषोऽन्त उदात्तः। फि० सू० १। इत्यन्तोदात्ताकारस्य, सर्वनामस्थाने चासम्बुद्धौ।६।१।८। इति दीर्घे न लोपे—आद्यकारोऽनुदात्तः।

१५—स्मयु। धातोः।६।१।१६२। इत्यन्तोदात्तः। ष्मिङ् ईषद्धसने तत "आद्युदात्तश्च।३।१।३। इत्य द्युदात्त उप्रत्यये "अनुदात्तं पदमेकवर्जम् ।६।१।१५८। इति गुणायादिष्टस्मघटकाकारोऽनुदात्तः।

१६—पथा। पतॢ गतावित्यस्मात् "पतः स्थ च। फि० सू० ४६०। इतीनिरन्तस्य स्थादेशश्च। उणादयोऽव्युत्पन्नानि प्रातिपदिकानीति पक्षे फिषोऽन्तः। फि० सू० ।१। इत्यन्तोदात्तः। अनुदात्तं पदमेकवर्जम्। ६।१।१५८। इत्यनुदात्तः पघटकाकारः। अनुदात्तौ ३।१।४। इति टाविभक्तिरनुदात्तः तस्मिन् परे टेर्लोपे "अनुदात्तस्य च यत्रोदात्तलोपः।६।१।१६१ इति थाघटकाकार उदात्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१७— विश्रावि । चादयोऽनुदात्ताः । फि० सू० ८४ । सूत्रेणाद्यनुदात्तो विरूपनिपातः । विशेषेण श्राव्यत इति विग्रहे बाहुलकात्कर्मणि विपूर्वकश्रुधातोर्णिनिः । आद्युदात्तश्च । ३।१।३ । इति प्रत्ययघटकेकार उदात्तः, ततः—"अकृतव्यूहाः पाणिनीयाः" इति परिभाषाया जागरूकतया "अनुदात्तं पदमेकवर्जम् ।६।१।१५८। इत्यस्याप्रवृत्तौ समासे समासस्यान्तोदात्तत्वे प्राप्ते 'गतिकारकोपपदात् कृत् ।६।२।१३९। वेः परस्य कृदन्तस्य प्रकृतिस्वरः । इदंशब्दः "स्वाङ्गशिटामदन्तानाम् । फि० सू० । २६ । इत्याद्युदात्तः तेनान्तानदात्तः । तत आमि स्वादिकार्य्ये–इदो लोपे "अनुदात्तौ सुप्पितौ ।३।१।४। इत्यनुदात्तः षाम्घटकाकारः, ततः "सावेकाचस्तृतीयादिर्विभक्तिः ।६।१।१६८।" इत्याद्युदात्त आमघटकाकारः ।

१८—तत । एषां परे विश्राविघटकेकारस्योदात्तस्य यणि "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य ।८।२।४।" इत्येकारः स्वरितः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ 'इषे त्वोर्ज्जे' इति मन्त्रं व्याख्यातुं प्रथमं मन्त्रः । तथाहिः—

हरिः ॐ॥ इषे त्वा वायवस्थदेवो वः सविता प्रार्पयतु श्रेष्ठतमाय
कर्मण,
आप्यायध्वमघ्न्या इन्द्राय भागम्
प्रजावतीरनमीवा अय क्ष्मा
माव स्तेन ईशत माघशँ सो ध्रुवा
अस्मिन् गोपतौ स्यात
बह्वीर्यजमानस्य पशून् पाहि ॥ १ ॥

अथ पदच्छेदः—

इषे । त्वा । ऊर्ज्जे । त्वा । वायवस्थदेवः । वः । सविता । प्रार्पयतु । श्रेष्ठतमाय । कर्म्मणे। आप्यायध्वम् । अघ्न्यायै । इन्द्राय । भागम् । प्रजावतीः । अनमीवा । आ । अय । क्ष्माः । मा । अव । स्तेनः । ईशत । माः । अघशँ सः । ध्रुवाः । अस्मिन् । गोपतौ । स्यात । बह्वीः । यजमानस्य । पशून् । पाहि । इति पदच्छेदः ।

अथ पदार्थोक्तिः—

१—"इषे" परब्रह्मणो या इच्छाशक्तिः तस्या वाचकः 'इषा' शब्दः; तस्य सम्बुद्धे रूपम् ।

२—"त्वा" युष्मच्छब्दस्य द्वितीयाया एकवचने 'त्वाम्' इति रूपम् ।

३—"ऊर्जे" परब्रह्मणो बलशक्तेः क्रियाशक्तेश्च वाचकः 'ऊर्जा' शब्दः, तस्य सम्बोधने रूपम् ।

४—"त्वा" युष्मच्छब्दस्य द्वितीयैकवचने 'त्वाम्' इति रूपं बलशक्ति-क्रियाशक्त्योर्बोधकम् ।

५—"वायवस्थदेवः" मारुतात्मजस्थदेवस्य बोधकत्वेन उपर्य्युक्तशक्तित्रयविशिष्टरामस्य बोधकः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

६—"वः" युष्मच्छब्दस्य द्वितीयाबहुवचने 'युष्मान्' इति रूपम् उपर्युक्तशक्तित्रयं बोधयति।

७—"सविता" अनन्तानन्तब्रह्माण्डोत्पादक-परब्रह्मस्वरूपं रामं बोधयति।

८—"प्र" प्रकृष्टत्वविशिष्टस्य बोधकः
९—"आ"
१०—"अर्पयतु"
} पदच्छेदे 'प्रार्पयतु' इत्येक एव शब्दः

११—"श्रेष्ठतमाय" सर्वोत्कृष्टाय मोक्षसाधकाय।

१२—"कर्म्मणे" वेदविहित-मोक्षसाधक-कर्त्तव्य-कर्म्मणे।

१३—"आप्यायध्वम्" वर्द्धयध्वम्

१४—"अघ्न्यायै" गवे "माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी॥ ६६॥ अर्ज्जुन्यघ्न्या रोहिणी स्यात्" इत्यमरः।

१५—"इन्द्राय" प्रसिद्धदेवराजाय।

१६—"भागम्"

१७—"प्रजावतीः" "प्रजा स्यात्संततौ जने" इतिकोषात् 'जनवतीः' रमाया विशेषणम्।

१८—"अनमीवा" रोगरहिता "अमीवा"॥ ४६॥ इति निघण्टुः। अस्य व्याख्या श्रीयास्केन कृतं "अमीवाभ्यमनेन व्याख्यातम्" इति। अस्य व्याख्या श्रीदुर्गाचार्य्येण लिखितं "रोगभूतः॥इति॥ अस्मिन् मन्त्रे न-अमीवा 'अनमीवा' रोगरहिता इत्यर्थः।

१९—"आ" अस्मिन् "आ प्रगृह्य स्मृतौ वाक्येऽप्यास्तु स्यात् कोपपीडयोः" (इत्यमरः)

"आप्रगृह्यः स्मृतौ वाक्येऽनुकम्पायां समुच्चये" (इति मेदिनी)
"ईषदर्थे क्रियायोगे मर्य्यादाभिविधौ च यः। एतमातं ङितं विद्याद् वाक्यस्मरणयोरङित्॥१॥ "आ इति वाक्यस्मरणयोः" (तत्वबोधिनी)

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

२०—"अय" 'अमीवापदेन सह प्रश्लिष्टस्य आङ्' इत्याकारस्य विश्लेषणं कृत्वा 'अय' क्रियया सह संयोजनेन 'आय' नाम आगच्छेत्यर्थः।

२१—"क्ष्माः" 'पृथिवी' इति प्रसिद्धा लोके वेदे च।

२२—मा" निषेधार्थमव्ययम् "मास्म मालं च वारणे" (इत्यम० तृ० का० अ०य० व० ४)

२३—"अव" इति क्रियापदम् 'रक्ष' इत्यर्थः

२४—"स्तेनः" चौरः "चौरैकागारिकस्तेनदस्युतस्करमोषकाः। प्रतिरोधि-परास्कन्दि-पाटच्चर-मलिम्लुचाः" (अ० द्वि० का० शु० व० २४)

२५—"ईशत" ईशनं शासनं पापेच्छूनां कुरुत।

२६—"माः" हे मातरः? "मा निषेधे च मातरि" इत्येकाक्षरकोषात्।

२७—"अघशँ्सः" अघशंसः अघेच्छुः।

२८—"ध्रुवाः" हे ध्रुवाः? वातात्मजस्थदेवस्य नित्याऽनपायिन्यः।

२९—"अस्मिन्" अस्मिन् भूतले।

३०—"गोपतौ" गोविन्दरक्षिते जने, गोविन्दपालितजनार्थम्।

३१—"स्यात" भवत, यूयम् इति कर्त्तृपदम्-अध्याहर्त्तव्यम्।

३२—"बह्वीः" बहुविधाः।

३३—"यजमानस्य" जनस्य।

३४—पशून्" गोमहिष्यादिसकलप्रजावर्गान्।

३५—"पाहि" रक्ष। इति पदार्थोक्तिः।

अथ विग्रहः (स्वर-संचारः) वाक्ययोजना च

अथ प्रकृति-प्रत्ययविभाजनपूर्वकः स्वरसंचारो विधीयते:—

१—"इषे" इष्यति महाप्रलयदशायां भगवति प्रलीनान्-असङ्ख्यात-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सहस्राणि जीवगणान् अनन्तजन्मोपार्जितकर्म्मफलानि भोजयित्वा भगवदिच्छया स्वस्वरूपज्ञानपूर्वकभगवत्स्वरूपज्ञानं कारयित्वा संसारबन्धनान्मोक्षयति या भगवदिच्छापरपर्य्याया भगवतो ज्ञानशक्तिस्वरूपा या सीता सा 'इषा" तत्सम्बुद्धौ हे इषे'। "इषुगतौ (दिवा० प०से०) गतिर्मोक्षः, गतिर्ज्ञानम्, गतिः प्राप्तिः, गतिर्गमनम् इतिचतुरर्थेषु मध्ये मोक्षार्थकादिष् धातोः "इगुपधज्ञाप्रीकिरः कः" ३।१।१३५ इतिकप्रत्यये टापि च कृते सम्बुद्धिदशायाम् 'हे इषे' इति सिद्धम्। अत्र 'इष्' इत्यस्य धातुसंज्ञायां "धातोः" ६।१।१५२ इतीकार उदात्तो जातः। ततः संजातकप्रत्ययस्याकारोऽपि "आद्युदात्तश्च" (३।१।३।) इति उदात्त एव जातः। ततः "अनुदात्तं पदमेकवर्जम्" (६।१।१५८) इतीकारोऽनुदात्तः, ततः टापि, अस्य 'अनुदात्तौ सुप्पितौ" ३।१।४ इत्यनुदात्तत्वे, अस्मिन्परे उदात्ताकारस्यानुदात्तस्य टाप आकारस्य दीर्घे "एकादेश उदात्तेनोदात्तः" इत्याकार उदात्तः "आमन्त्रितस्य च" । (६।१।१९८) इत्यस्य च्छान्दसत्वादप्रवृत्तौ सम्बोधने "इषे" अन्तोदात्त इत्येव सिद्धः।

२—"त्वा" त्वाम् इत्यस्य "पदात्"। ८।१।१६। "अनुदात्तं सर्वमपादादौ" ।८।१।१८। इत्यधिकृत्य "त्वामौ द्वितीयायाः"। ८।१।२३। इत्यनुदात्तः 'त्वा' आदेशः। ननु "आमन्त्रितं पूर्वमविद्यमानवत्" इति पूर्वामन्त्रितस्य "इषे" इत्यस्याविद्यमानत्वेन त्वामित्यस्य पदपरत्वाभावान्न त्वादेशः शङ्क्यः; छान्दसत्वादस्याप्रवृत्तेः।

३—"ऊर्जे !" "ऊर्ज बलप्राणनयोः" (चु० प० से०) ऊर्जयति पूर्वोक्तविशेषणविशिष्टान् जीवगणानुद्धर्त्तुं बलवत्यौ भवतः जीवतो ये भगवतो बलशक्तिः क्रियाशक्तिश्च ते 'ऊर्जे' तत्सम्बुद्धौ च 'हे ऊर्जे।' ऊर्ज इत्यस्मात् "इगुपधज्ञाप्रीकिरः कः" (३।१।१३५) इति कप्रत्ययः। "धातोः" (६।१।१५२) इति धातूकारस्योदात्तत्वम् "आद्युदात्तश्च" (३।१।३) इत्यकार उदात्तः। "अनुदात्तं पदमेकवर्जम्" इति-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शिष्टस्वरस्य बलीयस्त्वात् उकार अनुदात्तः। ततश्च गुणे 'त्वोर्ज्जे' इत्यत्र 'ओ' कारोऽनुदात्त एवान्तरतम्यात्। "आमन्त्रितस्य च" इत्यस्य छान्दसत्वादप्रवृत्तौ 'त्वोर्जे' इति सिद्धम्।

४—"त्वा" पूर्ववदनुदात्तः; अस्य "उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इतिस्वरितत्वम्।

५—"वायवस्थदेवो" वातीति वायुः। वायोरपत्यम् वायवः तस्मिन् वायवे; तिष्ठतीति स्थः। वायवे स्थ इति वायवस्थः। अत्र "वा गतिगन्धनयोः" (अ० प० अ०) इत्यस्माद् वा धातोः "कृवापाजिमिस्वदिसाध्यशूभ्य उण्" (उ० १।१।) इत्युण् प्रत्यये "आतो युच्" (३।३।१२८) इति युचि कृते वायुरिति सिद्धम्। ततः अपत्यार्थेऽणि, गुणे, अवादेशे च कृते 'वायव' इति सिद्धम्। 'वा' इत्यत्र "धातोः" (६।१।१५२) इत्यन्तोदात्तः, यकारोत्तरोकारः, "आद्युदात्तश्च" (३।१।३) इत्युकारः उदात्तः। अण् प्रत्ययस्याकारे प्रत्ययस्वरेणोदात्तः प्राप्तः; परञ्च 'छन्दसि दृष्टानुविधानात्' इतिसिद्धान्तेन "छन्दसि च" (फि० ३ पा० ५८ सू०) इति फिट्सूत्रेण द्वितीययकारोत्तरवर्त्तिनोऽकारस्योदात्तत्वे "अनुदात्तं पदमेकवर्जम्" (६।१।१५८) इत्याद्यन्तयोरनुदात्तत्वे मध्योदात्तत्वे "उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इति वकाराकारस्य स्वरितत्वे, स्था धातोः "सुपि स्थः" (३।२।४) इतिकप्रत्यये धातोराकारस्य लोपे प्रत्ययाकारस्य "आद्युदात्तश्च" (३।१।३) इत्युदात्तत्वे, ततः समासे, "समासस्य" (६।१।२२३) इत्यन्तोदात्तस्य प्राप्तौ सत्याम् "अनुदात्तं पदमेकवर्जम्" (६।१।१५८) इत्यन्तेतरेषां प्राप्तानुदात्तत्वं प्रबाध्य "तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीया कृत्याः" (६।२।२) इति सप्तम्यन्तपूर्वपदस्य प्रकृतिस्वरत्वे 'वायवस्थ' इति स्थितिः। ततः देव इत्यस्य पचाद्यजन्तत्वेन "चितः" (६।१।१६३) इत्यन्तोदात्तत्वे "अनुदात्तं पदमेक-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वर्जम्" इति 'दे' कारोत्तरवर्तिन वकारस्यानुदात्तत्वे "देवः" इति रूपं जातम्। ततः कर्मधारयसमासे "समासस्य" (६।१।२२३) इति वकारोत्तरवर्त्तिन उदात्ताकारस्य पुनः उदात्तत्वे "वायवस्थदेव" इतिस्थितिर्जाता; ततः प्रातिपदिकसंज्ञायां सौ अस्य सकारस्य रुत्वे 'हसि च' इत्युत्वे गुणे च कृते "वाय स्थदेवो" इति सिद्धम्।

६— "वः" युष्मान् "बहुवचनस्य वस्नसौ" इत्यत्र "पदस्य" "पदात्" अनुदात्तं सर्वमपादादौ (८।१।१८) इत्यनुवृत्य, अनुदात्त-वसादेशे "वः" इतिजातम्।

७— "सविता" "षू प्रेरणे" (तु० प० से०) सुवतीति 'सविता'। षू इत्यस्य धातुसंज्ञायां सत्वे "ण्वुल् तृचौ" (३।१।१३३) इति तृचि, इडागमे, गुणे, अवादेशे, चित्त्वादन्तस्योदात्तत्वे, प्रातिपदिक-संज्ञायां सौ, ततः "सविता" प्रेरकः।

८—"प्र" "उपसर्गाश्चाभिवर्जम्" (फि० ४।१२)

९—"अर्पयतु" ऋ गतिप्रापणयोः" (भ्वा० प० अ०) "ऋ गतौ" (जु० प० अ०) इत्यस्मात् "हेतुमति च" (३।१।२६) इति णिचि अर्त्ति-ह्रीव्लीरी क्नूयीक्ष्माय्यातां पुग्णौ" (७।३।३६) इति पुकि "पुगन्तलघूपध-स्य च" (७।३।८६) इति गुणे "अर्पि" इत्यस्य धातुसंज्ञायां लोटि तिपि शपि "एरुः" इति उत्वे च कृते 'अर्पयतु' इति सिद्धम् "पदस्य" "पदात्" "अनुदात्तं सर्वमपादादौ" इत्यनुवृत्य "तिङ्ङतिङः" इति सर्वे स्वरा अनुदात्ताः।

१०—"श्रेष्ठतमाय" अतिशयेन प्रशस्यः, इतिश्रेष्ठः "अतिशायने तमबिष्ठनौ" (५।३।५५) इति प्रशस्यशब्दाद्—इष्ठनि परे "प्रशस्यस्य श्रः"

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(५।३।६०) इति आदेशे "ञ्नित्यादिर्नित्यम्" (६।१।१९७) इत्यादेरुदात्त्वे, आन्तरतम्याद्गुणेऽपि एकारस्य उदात्तत्वे, "उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इति ठगताकारस्य स्वरितत्वे 'श्रेष्ठः' इत्यस्मात् पुनः तमपि, अस्य पित्वादनुदात्तौत्वे ततः 'ङे' इत्यस्य सुप्त्वादनुदात्तत्वे, आन्तरतम्याद् 'य' कारस्याप्यनुदात्तत्वे "श्रेष्ठतमाय" इति जाते "स्वरितात्संहितायामनुदात्तानाम्" (१।२।३९) इति त्रयाणां परिचयत्वे "श्रेष्ठतमाय" इतिरूपं जातम्।

११—"कर्म्मणे" करोतेः परस्य मनिनो नित्वादादेरुदात्तत्वे, वाकारस्य धातुस्वरेणान्तस्य चोदात्तत्वे, ततः 'ङे' इत्यस्य सुप्त्वादनुदात्तत्वे "कर्म्मणे" स्वरसिद्धिः।

१२—"आ" इति निपातः, 'निपाता आद्युदात्ताः' इत्युदात्तत्वे,

१३—"आप्यायध्वम्" "ओप्यायी वृद्धौ" (भ्वा० आ० से०) ओकारेकारेत्संज्ञकस्य प्यायित्यस्य धातुसंज्ञायाम् "धातोः" इत्यन्तोदात्तत्वम्, ततः "हेतुमति च" (३।१।२६) इति णिचि कृते पुनः सनाद्यन्ता धातवः" (३।१।३२) इति धातुसंज्ञायां धातुस्वरेण-इकारस्याप्युदात्तत्वे "अनुदात्तं पदमेकवर्जम्" (६।१।१५८) इति प्याऽऽकारस्यानुदात्तत्वे लोटो मध्यमपुरुषस्य बहुवचने ध्वमि शपि च कृते "णेरनिटि" इतीकारस्य लोपे पित्वाच्छवकारस्यानुदात्तत्वे "तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः" (६।१।१८६) इति ध्वमोऽकारस्यानुदात्तत्वे, पूर्वाऽऽकारेण सह संहितायाम् "उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इति प्याऽऽकारस्य स्वरितत्वे "स्वरितात्संहितायामनुदात्तानाम् (१।२।३९) यध्वमोकारयोः परिचयत्वे "आप्यायध्वम्" इतिरूपं जातम्।

१४—"अघ्न्या" = अघ्न्यायै "माहेयी सौरभेयी गौरुस्रा माता च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शृङ्गिणी ॥ ६६ ॥ अर्जुन्यघ्न्या रोहिणी स्यात्" (अ० द्वि० वै० ६) एवं नव नामानि निघण्टावपि विद्यन्ते, तद्यथा:— 'अघ्न्या, उस्रा, उस्रिया, अही, मही, अदितिः, इला, जगती, शक्करीति नव गोनामानि" । "अघ्न्या अहन्तव्या भवति' इति श्रीदुर्गाचार्य्यः । "अघ्न्यादयश्च" (५६१ उणादौ) यगन्ता निपात्यन्ते । हन्तेर्यक्, अडागम उपधालोपश्च । अघ्न्या माहेयी । "अघ्नः प्रजापतिः" इति कौमुद्याम् । अस्यास्तत्त्वबोधिन्यान्तुः—अघ्न्यादयश्च । अघ्न्य इति । यकःकित्त्वात् 'गमहन' इत्युपधालोपे 'हो हन्तेः' इति कुत्वेन हस्य घः । अडागममनुक्त्वा नञ्पूर्वाद्धन्तेर्यगित्यन्ये । "अघ्नेति स्त्रियां टाप्" । अघ्न्य इत्यस्य निपातनात् "निपाता आद्युदात्ताः । (८० फि० सू०) इति अकारस्योदात्तत्वे, ततष्टापः पित्त्वात् "अनुदात्तौ सुप्पितौ (३।१।४) इत्यनुदात्तत्वे "अकः सवर्णे दीर्घः" इत्याकारस्यानुदात्तत्वे आन्तरतम्यादाकारोऽप्यनुदात्त एव जातः ततः ङे, तस्य "सुपां सुलुक्···" इत्यादिना लुकि कृते "अघ्न्या" इत्यनुदात्तान्तरूपं जातम् ।

१५—"इन्द्राय" इन्दतीति 'इन्द्रः' 'इदि परमैश्वर्य्ये । (भ्वा० प० से०) इति इद्धातोः "ऋज्रेन्द्र (१८६ उणादि०) इत्यादिसूत्रेण रनि "ञ्नित्यादिर्नित्यम्" (६।१।१९७) इति निदन्तत्वादिन्द्रशब्द आद्युदात्तः, ततः परस्याकारस्य "उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इति स्वरितत्वे, ततः समागतस्य ङे·विभक्तेः सुप्त्वादनुदात्तत्वे कृते 'इन्द्राय' इति जातम् । अस्य "स्वरितात्संहितायामनुदात्तानाम्" इति प्रचयाख्ये स्वरे जाते 'इन्द्राय' इति सिद्धम् ।

अयमिन्द्रशब्दो मुख्यवृत्त्या परमात्मन एव वाचकः परमैश्वर्य्यस्यान्यत्रासम्भवात् । गौणवृत्या ऐश्वर्य्यलेशयोगाद्देवराजमपि वक्ति । अत्र देवराजस्य भागं तस्मै दापनाय प्रार्थना प्रतिभाति । परमात्मनस्तु "येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः । तेऽपि मामेव कौन्तेय !

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यजन्त्यविधिपूर्वकम् ॥२३॥ अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेव च। न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥२४॥ (गी० अ० ९) इति वचनेन श्रद्धयाऽन्यदेवार्थं क्रियमाणेन यज्ञेन स्वयमेव यजनं सम्पद्यते तदर्थं क्रियमाणेन यज्ञेन तस्य यजनस्य का कथा ? । ये तु भगवद्विभूति-भूतान् इन्द्रादीन् मत्वा स्ववर्णाश्रमानुरूपमिद्रादीनां पूजनं यत्र २ कर्मणि वेदादिविहितं तत्र तत्र भगवदात्मकानिन्द्रान् मन्यमाना इन्द्रादीन् यजन्ते। तेन यज्ञेन तुष्टा इन्द्रादयस्तेभ्यो याजकेभ्यः तदभिलषितं भगवता दीयमानं फलं यच्छन्ति; परमात्मा तु स्वात्मज्ञानं तेभ्यः प्रयच्छति, अर्थात् स्वात्मपरमात्मज्ञानं (ब्रह्मज्ञानं) दत्त्वा संसाराद् विमुच्य स्व-धाम प्रापयति। इन्द्रादीनां स्वातन्त्र्यं मन्यमानाः श्रीभगवता दीयमानं फलं स्वर्गं इन्द्रादिभ्यो लभन्ते तदन्तवद्भवति। तथा चोक्तम् श्रीभगवता 'लभन्ते च ततः कामान् मयैव विहितान् हि तान्। अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्" (गी० अ० ७।२२।२३ श्लो०) "ते तं भुक्त्वा-स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति" (गी० अ० ९।२१ श्लो०) इत्यादिवचनमनुसन्धेयम्। महर्षियास्केन इन्द्रशब्दस्य विग्रहो द्वादशप्रकारको दशमाध्याये "निरुक्तस्य दैवतकाण्डे" लिखितः। तद्व्याख्याकारेण श्रीदुर्गाचार्य्येण व्याख्यातः। अति विस्तरभयादत्र न लिखितः। पाठकवृन्दैस्तत एवावगन्तव्यः।

१६—"**भागम्**" भज्यते यो भक्तेन दीयमानपदार्थः सेव्यते स भागस्तम्। "भज सेवायाम्" (भ्वा० प० अ०) इत्यस्मात् "अकर्त्तरि च कारके संज्ञायां" इति घञ्-उपधावृद्धौ कुत्वे 'भाग' इति निष्पन्नः। "ञ्नित्यादिर्नित्यम्" इति निदन्तत्वादादेरुदात्तत्वे प्राप्ते "कर्षात्वतो घञो-ऽन्त उदात्तः" (६।१।१६१) इत्यन्तोदात्तत्वे, आद्यस्यानुदात्तत्वे ततोऽमि पूर्वरूपे च कृते "एकादेश उदात्तेनोदात्तः" (८।२।५) इत्युदात्तत्वे "**भागम्**" इति जातम्।

१७—"**प्रजावतीः**" प्रजायते = उत्पद्यते इति विग्रहे "उपसर्गे च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

संज्ञायाम्" (३।२।६६) इति जनेर्डे टि लोपे टापि तेन सहैकादेशे चोदात्तान्तादेव "प्रजाशब्दात्" "तदस्यास्त्यस्मिन्निति मतुप्" (५।२।६४) इति जातस्य मतुपः "मादुपधायाश्च मतोर्वोऽयवादिभ्यः" (८।२।६) इति वत्वे "उगितश्च" (४।१।४६) इति ङिपि च कृते अनयोः पित्वादनुदात्तत्वे "उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इति वकाराऽकारस्य स्वरितत्वे "स्वरितात्संहितायामनुदात्तानाम्" (१।२।३६) इत्येकश्रुतित्वे "प्रजावती" अतः शसि, अनुबन्धलोपे "प्रजावती अस्" इति दशायाम् "इको यणचि" (६।१।७७) इति प्राप्तं यणं प्रबाध्य "प्रथमयोः पूर्वसवर्णः" (६।१।१०२) इत्यान्तरतम्यादेकश्रुतित्वविशिष्टे दीर्घे रुत्वे परपदेन सह संहितायां विसर्गाभावे च कृते "प्रजावतीर्" इति जातम्।

१८—"अनमीवा" अत्र 'अ।' इति छित्वा उत्तरीयायक्रियापदेन योजनीयम्। अमन्ति रुजन्तीति 'अमीवा' 'अम रोगे" इत्यस्मात् 'शेवयह्वजिह्वाग्रीवाऽऽप्याऽमीवाः" (१६० उ०) इत्यनेन वेदे वप्रत्ययान्तोऽमीवशब्दो निपातितः। तस्य धातुस्वरेणाद्यकार उदात्तः; प्रत्ययस्वरेणान्ताकारोऽप्युदात्तः 'अनुदात्तं पदमेकवर्ज्जम्" (६।१।१५८) इति मध्येकारस्यानुदात्तत्वे "सति शिष्टस्वरबलीयस्त्वमन्यत्र विकरणेभ्यः" इत्युभयोरकारेकारयोरनुदात्तत्वे प्राप्ते "व्यत्ययो बहुलम्" (३।१।८५) इति स्वरस्य व्यत्यये कृते उदात्तत्वम्। ततः स्त्रीत्वविवक्षायां कृतस्य टापः पित्वाद् 'अनुदात्तौ सुप्पितौ' (३।१।४) इति अनुदात्तत्वे दीर्घे च कृते "एकादेश उदात्तेनोदात्तः" (८।२।५) इत्युदात्तत्वम्। ततश्चाद्यन्तयोरुदात्तत्वं मध्यस्यानुदात्तत्वं जातम्। ततश्च न अमीवा इत्यनमीवा अत्र "नञ्" (२।२।६) इति समासे "नलोपो नञः" (६।३।७३) इति नलोपे "तस्मान्नुडचि" इति नुडागमे 'अनमीवा' इति। "समासस्य" (६।१।२२३) इत्यन्तस्योदात्तत्वेन 'नञ्सुभ्याम्'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

(६।२।१७२) इत्यनेनाप्यन्तोदात्तत्वे" अनुदात्तं पदमेकवर्ज्जम्" (६।१।१५८) इति सर्वस्यानुदात्तत्वं प्राप्तं तत्प्रबाध्य 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' इत्यनेन पूर्वपदस्य नञोऽकारस्य प्रकृतिभावे तदुत्तराकारस्य "व्यत्ययो बहुलम्" इत्युदात्तत्वे 'अनमीवा' इति जातम्। 'अनमीवा' इत्यत्र नकाराकारस्योदात्तत्वे "उदात्तादनुदात्तस्य स्वरितः" इति मीकारेकारस्य स्वरितत्वं न शङ्क्यम् "पूर्वत्रासिद्धम्" (८।२।१) इत्यनेन "व्यत्ययो बहुलम्" इत्यस्यासिद्धत्वादिति तत्त्वम्।

१९—"आ" "ईषदर्थे क्रियायोगे मर्य्यादाभिविधौ च यः। एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित्" अनेन 'आय' क्रियायोगात् 'आङ्' इत्युपसर्गो निर्दिष्टस्थाने गतिविधानार्थप्रेरणार्थकः। अतएव निर्दिष्टस्थाने "आगच्छ" गच्छ ' इतिप्रयोगः सर्वत्र व्यवहारे प्रचलति। अथवा "आङीषदर्थेऽभिव्याप्तौ सीमार्थे धातुयोगजे ॥२३६॥ आप्रगृह्यः स्मृतौ वाक्येऽप्यास्तु स्यात्कोपपीडयोः। (अम० तृ० नाना० ३) "आ इत्यर्वागर्थे" इति निरुक्त उपसर्गार्थनिरूपणप्रकरणे 'अर्वाग्' इत्यस्य "आपान्तमन्युः" ॥ ४५ ॥ इति व्याख्यायाम् "नार्वागिन्द्रं प्रतिमानानि दभ्नुवन्ति" इत्युदाहृतम्। अस्य व्याख्या स्वयं निरुक्तकारेणैवं कृतम् "अर्वागेवैनमप्राप्य विनश्यन्तीति।" श्रीदुर्गाचार्य्येण तु "अर्वागेव" तान्यूनान्येव व्याख्याय स्पष्टीकृतोऽर्थः। ऊनं नाम हीनं दुर्बलं वा! एवमनेकेष्वर्थेषु दृश्यते 'आ' शब्दः। तथापि गत्यर्थकधातुयोगे 'आङ्' सम्बोध्यमानस्य मध्यमपुरुषस्य सम्बोधयितुः सान्निध्यार्थं द्योतयति। यथा आगच्छ, आयध्वम्, एहि २ कृष्ण ३ अत्र गोश्चरतीत्यादयो लोके प्रचलितव्यवहारे दृश्यन्ते। अतोऽत्र 'अय गतौ' इतिगत्यर्थकधातुयोगे 'आय = आयध्वम् = आगच्छत यूयम् अस्मिन् लोकेऽयमर्थः प्रतिभाति। स्वरोऽत्रोदात्तो निपातत्वात्

२०—"अय" पूर्वपदाश्लिष्टाऽऽकारस्य छेदे 'आ—अय' इत्यत्रा

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नुदात्तेत अय धातोः "व्यत्ययो बहुलम्" इत्यात्मनेपदव्यत्यासेन परस्मैपदे, बहुवचनव्यत्यासेनैकवचने लोटि, सिपि, ह्रौ, शपि, हेर्लुकि कृते धातुस्वरेणाऽकार उदात्तः, शपः पित्वात् तदकारोऽनुदात्तः प्राप्तः तम्प्रवाध्य "तिङ्ङतिङः" (८।१।२८) इति सर्वनिघाते "उदात्तादनुदात्तस्य स्वरितः" इति धातोरकारस्य स्वरितत्वे, 'अय' इति।

२१—"क्ष्मा" पृथिवीति प्रसिद्धवस्तु, अस्य फिट्स्वरेणोदात्तत्वे, ततः शसि, दीर्घे, रुत्वे यलोपे च कृते 'क्ष्मा' इति।

२२—"मा" इति निषेधार्थकमव्ययम्, अस्य निपातत्वादुदात्तत्वम्

२३—"अव" 'अव रक्षणे' लोटि मध्यमपुरुषस्य बहुवचनस्थाने "व्यत्ययो बहुलम्" इति बहुवचनस्य व्यत्यासेनैकवचने कृते 'अव' रूपं जातम्। अर्थस्तु 'अवत' रक्षतेति वेदितव्यम्। अत्र 'तिङ्ङतिङः" इति सर्वस्य निघाते दीर्घे "एकादेश उदात्तेनोदात्तः" (८।२।५) इत्युदात्ते "उदात्तादनुदात्तस्य स्वरितः" वकाराकारस्य स्वरितत्वे रूपसिद्धिः।

२४—"स्तेनः" स्तेनयति चोरयतीति स्तेनः 'स्तेनचौर्य्ये' इत्यस्मात्पचाद्यचि, चित्स्वरेणान्तोदात्ते "अनुदात्तं पदमेकवर्ज्जम" इति स्तेघटकैकारस्यानुदात्तत्वे 'स्तेनः' इति जातम्

२५— "ईशत" "ईश ऐश्वर्य्ये" (अ० से० आ०) "छन्दसि लुङ् लङ् लिटः" (३।४।६) इति लङि 'झ' प्रत्ययस्य "आत्मने पदेष्वनतः" (७।१।५) इत्यतादेशे शपो लुकि शकारस्य परवर्णेन सह संयोगे "न माङ् योगे" (६।४।७४) इत्यडभावे 'ईशत' इति रूपम्। अत्र "धातोः" इवीकारस्योदात्तत्वे, "आद्युदात्तश्च" (३।१।१३) इति शकराकारस्योदात्तत्वे, "अनुदात्तं पदमेकवर्ज्जं" (६।१।१५८) इत्याद्यन्तयोरनुदात्तत्वे. उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इतीकारस्य,

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्वरितत्वे 'ईशत' इत्याकारकं रूपं जातम् ।

२६—"मा" अस्य निषेधार्थकनिपातत्वादाद्युदात्तत्वम्

२७ —"अघशँ सो" 'अघि गत्याक्षेपे' आक्षेपो निन्दा । गतौ गत्यारम्भे चेत्यन्ये । (भ्वा० आ० से०) अङ्घ्यते निन्द्यते साधुभिर्यत्कर्म्म तदघम् "अंहोदुःखव्यसनेष्वघम्" (इत्यम० ना० तृ० का०) "अघं दुःखे व्यसनैनसोः" इति हैमः । इन्द्रासोमावघस्य शंसितारम् अघं हन्तेर्निर्ह्रसितोपसर्ग आहन्तीति" (निरुक्ते ६ अ० ११ खं०) "हे इन्द्रासोमौ"सन्तापयतं भवन्तौ, अघशंसं पापस्य शंसितारम्' इति श्रीदुर्गाचार्य्यः । अत्र कर्म्मणि पचाद्यचि । आगमशास्त्रस्यानित्यत्वान्नुम् । "चितः" (६।१।१६३) इत्यन्तस्योदात्तत्वे आदेरनुदात्तत्वम् "शसि इच्छायाम्' अघं पापं शंसन्ति इच्छन्तीति अघशंसः । अत्रापि पचाद्यचि चित्त्वादन्ताकारस्योदात्तत्वे "अनुदात्तं पदमेकवर्जम्' इतिशकाराकारस्यानुदात्तत्वे उदात्ताकाराऽऽकारेण सह अघाद्यकारस्य सवर्णदीर्घे च कृते "एकादेश उदात्तेनोदात्तः" "उदात्तादनुदात्तस्य स्वरितः" इति शकाराकारस्य स्वरितत्वे "माघशंसः" इतिजातम् । अत्रानुस्वारस्य सकारे परेँ कारादेशे "माघशँ सः" इतिजातम् । उत्तरीयध्रुवशब्देन सह संहितायाम् "हशि च" इति कुत्वे गुणे च कृते 'माघशँ सो ध्रुवा" इति रूपं जातम् ।

२८—"ध्रुवा" "ध्रुगतिस्थैर्य्ययोः" ध्रुव इति पाठान्तरम् । आद्यस्य ध्रुवतीत्यादि गुवतिवत् । द्वितीयस्तु सेट् । ध्रुवन्ति त्रिकालेषु वर्त्तन्ते या भगवतो रामस्य पत्न्यः ता ध्रुवाः सदाऽनपायिन्यः । ज्ञानबलक्रियाशक्तयः । 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इतिश्रुतेः । आसामेव तिसृणां रामशक्तीनां नामान्तराणि दृश्यन्ते श्रीमद्रामायणे । "रामस्य दक्षिणे पार्श्वे सपद्मा श्रीरुपासिता । सव्येह्रीर्महादेवी व्यवसायस्तथाग्रतः । (६॥ उत्तरे स० १०६) अस्य रामायणस्य मूलम्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

उपर्य्युक्तश्रुति:तथा चायं मन्त्रश्च:-"श्रीश्च ते लक्ष्मीश्च पत्न्या वहोरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् । इष्णन्निषाण मुंम इषाण सर्वलोकं म इषाण" (यजुः अ० ३१, म० २२) इति । उपर्य्युक्तश्रुतिस्मृतीना-मेकवाक्यत्वेन विचारिते सति यजुष एवं पर्य्यवसितोऽर्थो वेदितव्यः— श्रीरामस्य दक्षिणे पार्श्वे ज्ञानशक्त्यपरपर्य्याया पद्मधारिणी श्रीदेवी, वाम-पार्श्वे बलशक्त्यपरपर्य्याया लक्ष्मीदेवी (ह्रीदेवी वा महीदेवी) विराजते क एवंभूते ते इत्यत आह "अश्विनौ" अस्य पदस्य व्याख्या महर्षिश्रीया-स्केन निरुक्तस्य १२ अ० १ खण्डे एवं लिखिता विराजते । तथा हि:— "अश्विनौ" ।। १ ।। अश्विनौ यद् व्यश्नुवाते सर्वं, रसेनान्यो, ज्योति-षान्यः ।। ३ ।। अस्य व्याख्या श्रीदुर्गाचार्य्येणैवं कृता । तथाहि:— "अश्विनौ" (१) कस्मात् ? "यद्व्यश्नुवाते सर्वम्" केन ? "रसे-नान्यः" रसेनोदकेन सर्वं व्यश्नुते व्याप्नोति ।। "ज्योतिषान्यः" ज्योति-षैकः ।। १२।१।३ ।। इतः परं महर्षिगणबहुष्वर्थेषु "अश्विनौ" इतिपदम् प्रदर्शितम् । ऋचश्च तदर्थे बह्वयः प्रदर्शिताः । श्रीदुर्गाचार्य्येणापि सर्वं व्याख्यातम् । तत्तु तत्रैव द्रष्टव्यमस्ति । अत्र तूक्तमन्त्र उपर्युक्तोद्धरणेनैव प्रस्फुटितार्थो भवति । अत एतावदेवोद्धृतम् । अत्र "अश्विनौ" इति पदम् "पत्न्यौ" इत्यस्य विशेषणम् । तथाचोपर्य्युक्तवेदार्थभूतेतिहास-वचनेन सहोक्तमन्त्रस्य व्याख्या एवम्भवति:— हे राम ! 'ते' तव 'पत्न्यौ' 'अश्विनौ' तत्रैका रसेनोदकेन सर्वत्र व्याप्ता सती तव पार्श्वे निरन्तरं तिष्ठति सा महीत्यपरपर्य्याया लक्ष्मीदेवी । अन्या ज्योतिषा=प्रकाशेन सर्वं दिव्यादिव्यकार्य्यजातमभिव्याप्य तव पार्श्वे मूर्त्तिमती सती निर-न्तरं तिष्ठति सा 'श्री' सीतेत्यपरपर्य्याया "श्रियःश्रीं भक्तृवत्सलाम्" ( ) इति श्रीरामायणीयवचनेन सुसङ्गता प्रतिभाति । 'ज्यो-तिष'शब्दस्यात्र प्रकाशोऽर्थः "ज्योतिरग्नौ दिवाकरे । पुमान्, नपुसकं दृष्टौ स्यान्नक्षत्रप्रकाशयोः" (इतिमेदिनी) कोषात् । द्वितीयचकारात् क्रियापरपर्य्याया (लीलादेवी) व्यवसायशक्तिरग्रे पश्चाद्विराजते रामस्य सूर्य्यस्य प्रभा यथा । अस्या एव 'रूपं' रूपाणि 'व्यात्तम्' व्याति-तानि सततरासन्तशीलानि 'नक्षत्राणि' विराजन्ते इत्युपलक्षणं लीला-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विभूतीनाम् । निखिलदिव्यादिव्यसृष्टिरूपेण परिणतानां वेदितव्यम् । व्यात्तमित्यत्र बाहुलकादिडागमशास्त्रस्य विभाषात्वेनाप्रवृत्तिः । निखिलदिव्यादिव्यसृष्टीनां शासनशीलस्य संबोधनम् एकम् इषाणपदम्—तथा च हे ईषाण ! इदं जगत्स्रष्टु शासितुं य इच्छति स इषाणः तत्सम्बुधौ हे इषाण !' । अत्र "इष इच्छायाम्' इति तौदादिको धातुः ततो व्यत्ययेनात्मनेपदम् । तस्य लटि 'त' प्रत्ययस्य स्थाने बाहुलकाच्छानचि मुगभावे णत्वे छकाराभावे च कृते 'इषाणः" इतिसिद्धम् । तथा च हे इषाण ! त्वत् 'निष्कारणंब्राह्मणैः षडङ्गो वेदो ध्येयो गेयश्चेत्यनुशासनात् वेदाध्यायिने मह्यं सकलवेदानां स्वरतो वर्णतोऽर्थतश्च ज्ञानं दातु दापयितुं चेषाणन् इच्छन् 'अमुम्' लोकमागन्तुमिषाण इच्छ अर्थाद् यस्मिन् लोकेऽहं वर्त्तेतमिमं लोकंमागमनेच्छां कुरु इतिभावः । तथा त्रागत्य 'सर्वलोकम्' अनुशासितुं 'इषाण' इच्छ अथवा यः कोऽपि यया कया वासनया वाध्यमानः सन् पुरुषसूक्ताध्यायस्य षोडशमन्त्रैर्भगवतः पूजनं विधायोत्तरषणमन्त्रेण स्तुतिं विदधाति तस्य तन्मनोरथं भगवान् पूरयति। अथवा श्रीमद्भागवतदशमस्कन्धस्य प्रथमाऽध्याये १७ श्लोकादारभ्य २५ श्लोकपर्य्यन्तग्रन्थः अनुसन्धेयोऽस्ति। तत्र 'तत्र गत्वा जगन्नाथं देवदेवं वृषाकपिम् । पुरुषं पुरुषसूक्तेन उपतस्थे समाहितः ॥२०॥ इत्ययं श्लोको विशेषरूपेणानुसन्धेयोस्ति । अनेन पुरुषसूक्ताध्यायेन प्रार्थितो भगवान् भक्तानां मनोरथसिद्ध्यर्थं स्वयमवतरति साधयति च सकलमनोरथान् भक्तानाम् । इति अस्याध्यायस्य वास्य मन्त्रस्य पाठकानां परमात्मानं परमेश्वरं जगत्कारणं सर्वत्र स्वशक्तित्रयेण सह रमणशीलं श्रीरामं प्रति दैनिकप्रार्थना भवति विदुषां । अनया प्रार्थनया प्रार्थितो भगवान् अवतरति लोकेऽस्मिन् । यदि स्वरवर्णोच्चारणदोषरहितमन्त्रपाठो भवेत् । अन्यथा "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ इति पाणिनीयशिक्षायां विराजते । अस्यैव मन्त्रो हीनः 'एतावन्मात्रस्य स्थाने "दुष्टःशब्दः" इतिपाठपरिवर्त्तनं कृत्वा भगवता पतञ्जलिना महाभाष्ये उद्धरणं कृतम् । स्वरविषयिका अन्या अपि कथाः पुराणेषु-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पलभ्यन्ते। अतः स्वरज्ञानस्यात्यावश्यकतां प्रबुध्य स्वरसंचारो विधीयते। "ध्रुवाः" इत्यस्य पचाद्यजन्तत्वात् "चितः" (६।१।६३) इत्यन्तोदात्तत्वे 'अनुदात्तं पदमेकवर्ज्जम्" (६।१।१५८) इत्याद्युकारस्यानुदात्तत्वे "ध्रुवाः" इति रूपं जातम्। पश्चात् जसि पूर्वसवर्णदीर्घे "एकादेश उदात्तेनोदात्तः" (८।२।५) इति पूर्ववदुदात्तत्वमेवावस्थितम्।

२९—"अस्मिन्" "इदि परमैश्वर्य्ये" इत्यस्माद्धातोः "इन्देः कमिनलोपश्च" इत्युणादिसूत्रेण कमिप्रत्ययस्यानुबन्धयोर्धातोर्नकारस्य च लोपे 'इदम्' अत्र धातुस्वरेणेकारस्य प्रत्ययस्वरेणाकारस्य उदात्तत्वे प्रातिपदिकसंज्ञायां सप्तम्येकवचने ङौ 'त्यदादीनामः' (७।२।१०२) इत्यत्वे पररूपे "हलि लोपः" (७।२।११३) इतीदो लोपे "ङसिङ्योः स्मात्स्मिनौ" (७।१।१५)इति स्मिन्नादेशे "ऊडिदम्पदाद्यपपुम्रैद्युभ्यः" (६।१।१७६) इति स्मिन्नित्यस्येकारस्योदात्तत्वे, 'अनुदात्तं पदमेकवर्ज्जम्' (६।१।१५८) आद्यकारस्यानुदात्तत्वे "अस्मिन्" इति जातम्। सर्वनामशब्दोऽयं सन्निहितपरामर्शीति वेदितव्यम्।

३०—"गोपतौ" गां पातीति गोपतिः, तस्मिन्। "गमेर्डोः" (२३५उ०)"इतिडोप्रत्ययेगो इति। गौर्नादित्येबलीवर्दे किरणक्रतुभेदयोः। स्त्री तु स्याद् दिशि भारत्यां भूमौ च सुरभावपि। नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु।"इति केशवः पातीति पतिः "पातेर्डतिः"(५०६) इत्युणादिसूत्रेण डति प्रत्यये कृते गोशब्दात् कर्म्मणि षष्ठी, ततश्च षष्ठीतत्पुरुष समासे कृते 'गोपतिः' इति जायते। अत्र प्रत्ययस्वरेणोभयोराद्युदात्तत्वे, अन्तस्यानुदात्तत्वे, समासत्वात्पूर्वपदस्य "पतावैश्वर्य्ये"(६।२।१८) इत्यनेन प्रकृतिस्वरत्वे उत्तरपदस्यानुदात्तत्वम्, ततश्च उदात्तादनुदात्तस्य स्वरितः" (८।४।६६) इति पकाराकारस्य स्वरितत्वे "स्वरितात्संहितायामनुदात्तानाम्" इति तिघटकेकारस्यैकश्रुतित्वे "गोपतौ" इति जातम्।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

३१—"स्यात" अस्तेः पार्थनायां लिङि, अस्य तिबाद्यादेशे तत्र मध्यमपुरुषस्य बहुवचनस्य थस्य तादेशे यासुटः सलोपे धातोरल्लोपे 'स्यात' इति जातम्। अस्य "तिङ्ङतिङः' (८।१।२२) इति निघातत्वम्।

३२—"बह्वीः" बहुशब्दात् स्त्रीत्वविवक्षायाम् "बह्वादिभ्यश्च" इति ङीषि यणि बह्वीत्यत्र प्रत्ययस्वरेणेकारस्योदात्तत्वे बकाराकारस्यानुदात्तत्वे प्रातिपदिकत्वे शसि "प्रथमयोः पूर्वसवर्णदीर्घः" इतिदीर्घे रुत्वविसर्गयोः सतोः "बह्वीः" इति जातम्।

३३—"यजमानस्य" यजते इति यजमानः। अत्र यज्धातोः "पुङ्यजोः शानन्" (३।२।१२८) इति शानंनि अनुबन्धलोपे शपि मुगागमे कृते 'यजमान' इति दशायां नित्त्वादाद्युदात्तत्वे शेषस्यानुदात्तत्वे "उदात्तादनुदात्तस्य स्वरितः" इति जकाराकारस्य स्वरितत्वे 'स्वरितात्संहितायामनुदात्तानाम्" इति शेषस्यैकश्रुतित्वे "यजमानस्य" इतिजातम्।

३४—"पशून्" पश्यन्ति खाद्याखाद्ये गन्धेन जानन्तीति पशवः, तान् पशून् "तिर्यग्जातौ पशुः प्रोक्तः सर्वप्राणिषु पुंस्ययम्" प्रमथानामिति वा। 'पशुर्मृगादौ छगले प्रमथे च पुमानयम्" इतिरभसः "पशुदृश्यर्थमव्ययम्" इति धरणिः। सर्वानविशेषेण पश्यतीति पशुः ज्ञानिनि। दृश्धातोः "अजिदृशिकम्यमीत्याद्युणादिसूत्रेण कुप्रत्यये पशादेशे प्रातिपदिकत्वे शसि दीर्घे सस्य नादेशे 'पशून्' इति जातम्। अत्र प्रत्ययस्वरेणोकारस्य उदात्तत्वे पकाराकारस्यानुदात्तत्वे "पशून्" इति

३५—"पाहि" लोटि मध्यमपुरुषबहुवचनस्य "व्यत्ययो बहुलम्" इति व्यत्यये कृते एकवचने "सेर्ह्यपिच्च" (३।४।८७) इति ह्यादेशे "पाहि" इति जातम्। अस्य "तिङ्ङतिङः" इति सर्वनिघाते संहितायाम् "उदात्तादनुदात्तस्य स्वरितः" इति स्वरितत्वे "पाहि" इतिसिद्धम्।

॥ इति विग्रहः पदार्थोक्तिः स्वरसञ्चारश्च समाप्तः ॥

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

* अथ वाक्ययोजना विधीयते *

हे "इषे त्वा" कोऽर्थः 'त्वाम्'। "इषे" नाम जगत्कर्त्तुः परब्रह्मणः इच्छाशक्तेः सम्बोधनम् "इष गतौ" (दि० प० से०) "इषु इच्छायाम् (तु० प० अ०) इतिधातोः स्मरणात्। सचराचरं जगत्स्रष्टुमिच्छति यया शक्त्या सा इषा। अथवा सचराचरजगत् स्रष्टुं या शक्तिरिष्यते सा 'इषा' तत्सम्बुद्धौ हे इषे त्वाम्। "हे ऊर्ज्जे! त्वा=त्वाम्। अत्र "ऊर्ज्ज बलप्राणनयोः (चु० उ० से०) इत्यूर्ज्जधातोः पचादित्वादचि टापि च कृते "ऊर्ज्जा" इति सिद्धम्। ततश्च ऊर्ज्जा च उर्ज्जा चेति विग्रहे "सरूपाणामेकशेष एकविभक्तौ" इत्येकस्य शेषे अन्यस्य लोपे ततः सम्बुद्धेर्द्विवचनविवक्षायाम् 'औ' विभक्तिः समागता, अस्याः "औङ आपः" इतीकारादेशे गुणे च कृते हे ऊर्ज्जे' इति सम्पन्नं रूपम्। अस्य द्व्यर्थकधातुनिष्पन्नत्वाद् अर्थचिन्तनकाले अर्थद्वयस्योपस्थितिर्जायते। तत्रैकोऽर्थः "हे ऊर्ज्जे'' हे सूर्य्य चन्द्रपृथिव्यादिसृज्यमानसकलपदार्थधारकभगवद्बलशक्ते?। द्वितीयोऽर्थस्तु "हे ऊर्ज्जे" हे दृष्टादृष्टश्रुताश्रुतसकलपदार्थोत्पादकभगवत्क्रियाशक्ते?। "त्वा" इत्यत्रापि "ऊर्ज्जे'' इत्यत्रार्थद्वयस्य प्रतीतिबलात् एकस्य 'त्वा' पदस्याध्याहारात् "त्वा" कोऽर्थः त्वाम् त्वाम् इति पदद्वयं वेदितव्यम्भवति। तथा च हे ऊर्ज्जे != हे सूर्य्यचन्द्रपृथिव्यादिसृज्यमानसकलपदार्थधारकभगवद्बलशक्ते! हे ऊर्ज्जे! = दृष्टादृष्टश्रुताश्रुतसकलदिव्यादिव्यपदार्थोत्पादकभगवत्क्रियाशक्ते ? त्वाम्; "अस्मिन्" लोके "वः" युष्मान् "सविता' जगत्प्रसविता "वायवस्थदेवः" वायोरपत्यं वायवः तत्र तिष्ठतीति वायवस्थः=मारुतात्मजस्थः; दीव्यति रमते सर्वत्र अथवा दीव्यन्ति रमन्ते सर्वाणि भूतानि यस्मिन् स देवः, वायवस्थश्चासौ देवश्चेति "वायवस्थदेवः' रामः, अस्य वेदार्थोपबृंहणभूतरामायणादौ अनेकस्थलेषु पवनतनयस्थत्वेन वर्णनप्रसिद्धेरत्र ग्रहणं समुचितं प्रतिभातीति सहृदयैरेव वेदितव्यमस्ति "श्रेष्ठतमाय कर्म्मणे" श्रेष्ठतमं कर्म्म संपादयितुं कर्त्तुं कारयितुं वा प्रार्पयतु। यूयम् "प्रजावतीः अनमीवाः" जनवतीः "प्रजा स्यात्सन्ततौ जने" इति कोषात्। रोगरहिताम् (भूमेर्विशेषणम् "पशव्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इति श्रुत्या "रामस्य दक्षिणे पार्श्वे सपद्मा श्रीरूपाश्रिता। सव्ये तु महोदेवी व्यवसायस्तथाग्रतः॥ इति रामायणीयवचनेन सहैकवाक्यतयोक्तश्रुत्या भगवतः श्रीरामस्योपर्य्युक्तशक्तित्रयं प्रतिपादितम्भवतीति वेदितव्यम्। तथा च "अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥ मम योनिर्महद् ब्रह्म तस्मिन्गर्भं दधाम्यहम्। सम्भवः सर्वभूतानां ततो भवति भारत॥३॥ सर्वयोनिषु कौन्तेय! मूर्तयः सम्भवन्ति याः। तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता॥४॥ (गीता १४ अ०) एभिर्भगवद्वचनैः सहोक्तश्रुतिस्मृत्योरेकवाक्यतया भगवतो व्यवसायशक्तिर्महाप्तेजोवायुव्योमात्मना परिणता सती चतुरशीतिलक्षयोनिरूपधारिणीभूत्वा भगवन्तं रमयति। अतोऽव्ययात्मा भूतानामीश्वरोऽपि भगवान् स्वाप्रच्युतस्वभावमधितिष्ठन् ताभिः सहैकरूपो भूत्वा रमते। सर्वेषां स्वलीनानां जीवात्मनां बीजस्वरूपाणां तासु चतुरशीतिलक्षयोनिरूपासु व्यवसायापरपर्य्यायलीलादेवीषु प्रक्षेपं करोति। तास्तिस्रः शक्तयः तानुत्पादयन्ति रक्षन्ति भगवदाज्ञास्वरूपश्रुतिस्मृतीतिहासपुराणप्रदर्शितमार्गं समुल्लङ्घ्य वर्त्तमानान् दण्डयन्ति संहरन्ति। ता ध्रुवा भगवच्छक्तीः प्रार्थयति:— हे ध्रुवाः? हे माः=मातरः यूयम् भगवदाज्ञया प्रजावतीः जनवतीः। अमीवा रोगरहिताः क्ष्माः=पृथिवीः आ-अय=आयध्वम् आगच्छत इहागत्य "अघ्न्यायै" गवे "इन्द्राय" चेति देवर्षिपितृणामुपलक्षणम्। तथा चेन्द्रादिदेवर्षिपितृभ्यो "भागम्" "सह यज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक्॥१०॥ देवान्भावयतानेन ते देवा भावयन्तु वः। परस्परं भावयन्तः श्रेयः परमवाप्स्यथ॥११॥ इष्टान्भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः। इति भगवदादेशानुगुणं देवांशम् "अंश भागास्तु वण्टके" (अ० वै० ८६) कोषात्। "आप्यायध्वम्" वर्द्धयध्वम्। यस्तु "वैर्दत्तान्नप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः" ॥१२॥ इति भगवता प्रदर्शितः स्तेनः=देवयज्ञस्य पितृयज्ञस्य ऋषियज्ञस्याकर्त्ता यः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तम् "मात्र" मा अवत=तं नहि रक्षत । किन्तु "अघशँसः" अघं पापं शंसति इच्छति यः स अघशंसः तम् "ईशत" दण्डयत, विनाशयत "गोपतौ" भूमिपतौ गोविन्दपतौ=भगवदाज्ञास्वरूप-वेदस्मृतिविहितपञ्चमहायज्ञकर्त्तरि गृहाश्रमिणि निमित्तं अघशंसकस्य चौरस्य विनाशनम् समुचितम् प्रतिभाति। अत्र भूम्यर्थकगोशब्दस्य योगात् 'गोपति' शब्दो गृहाश्रमिपरः। अन्येषामाश्रमिणाम्भिक्षावृत्तिकत्त्वेन भूमेरयोगात्। गृहस्था एव पञ्चयज्ञसम्पादनार्थं धनं संगृह्णन्ति तच्चौरा न हरेयुरेतदर्थं प्रार्थना। चौरैर्हृते धने पञ्च यज्ञं सम्पादयितुं नहि शक्ष्यन्ति गृहस्थास्तदा वै वैदिकमार्गाः प्रणष्टा भविष्यन्तीति हेतोरियं प्रार्थना समुचितैव। अतः परं प्रार्थयति "यजमानस्य" भगवदाज्ञानुरूपं पञ्चमहायज्ञान् यजते यः स यजमानः तस्य "बह्वीः" पुत्रपौत्रादिरूपा बहुसन्ततीः 'पशून्' गोमहिष्यादिपशून् "पाहि" पात रक्षत।

इति वाक्ययोजना

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ ऋग्वेदीय 'भद्रो भद्रये' ति मन्त्रस्य रामपरकत्वं दर्शयितुं प्रथमं तन्मन्त्र उद्ध्रियते ।

भद्रो भद्रया सचमान आगात् स्वसारं जारो अभ्येति पश्चात् ।
सुप्रकेतैर्द्युभिरग्निर्वितिष्ठन् रुशद्भिर्वर्णैरभि राममस्थात् ॥३॥

ऋग्वेदस्य ७ अ, ५ अ, ३१ व, ३ मन्त्रः ।

अथ पदच्छेदः—

भद्रः । भद्रया । सचमानः । आ । अगात् । स्वसारम् । जारः । अभि । एति । पश्चात् । सुप्रकेतैः । द्युभिः । अग्निः । वितिष्ठन् । रुशद्भिः । वर्णैः । अभि । रामम् । अस्थात् ।

अथ पदार्थोक्तिः—

१—भद्रः —

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रासखायः सख्यातिजानते भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥

एतन्मन्त्रघटकभद्रपदस्य व्याख्या श्रीयास्केनैवं कृता:—

"तत्र सखायः सख्यानि संजानते भद्रैषां लक्ष्मीर्निहिताधिवाचि इति। भद्रं भगेन व्याख्यातंभजनीयं भूतानामभिद्रवणीयम् भवद्रमयतीति वा भाजनवद्वा (निरुक्तदैवतकाण्डे ४ अ, ६ खं०)

इदं निरुक्तं श्रीदुर्गाचार्य्येणैवं व्याख्यातम्; तद् यथास्ति तथा निदर्श्यते:—

"भद्रा" भन्दनीयाः "भद्रं" भगेन व्याख्यातम् स्त्रीभगः तथा स्यात् । भजतेः (११७) इति । भजनीयम् इति भूतानाम् "अभिद्रवणीयम्" अभिगमनीयमित्यर्थः । "भवद् रमयतीति वा" यस्य हि तद् भवति स रमते । "भाजनवद्वा" सन्निहितकल्याणरूपाः पुरुषाः, ये तस्य भाजनम् । तैः तद्वत् ।" इति । निरुक्ते दैवतकाण्डे १२ अ, १७ खं. "शुक्रं त अन्यद् यजत इति मन्त्रघटक "भद्रा" पदस्य व्याख्या श्रीदुर्गाचार्य्येण "भद्रा" भन्दनीया स्तुत्या "राति" दानम्" एवं लिखिता ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

"श्वः श्रेयसं शिवं भद्रं कल्याणं मङ्गलं शुभम् ॥२॥
भाविकं भविकं भव्यं कुशलं क्षेममस्त्रियाम्"

(इति अ० को० प्रथमका० कालवर्गे)

"अनड्वान् सौरभेयो गौः" (इति द्वितीय का० वैश्यवर्गे)

"भद्रः शिवे खञ्जरीटे वृषभे तु कदम्बके ।
करिजातिविशेषे ना क्लीबं मङ्गलमुस्तयोः ॥
काञ्चने च स्त्रियां रास्ना कृष्णा व्योमनदीषु च ।
तिथिभेदं प्रसारिण्यां कट् फलानन्तयोरपि ॥
त्रिषु श्रेष्ठे च साधौ च न पुंसि करणान्तरे । (इति मेदिन्याम्)

२–स्वसारम्=अस्य व्याख्या निरुक्ते दैवतकाण्डे ११ अ०, ३२ खं०, एवं लिखितास्ति

"सिनीवालि पृथुष्टुके या देवानामसि स्वसा ।
जुषस्व हव्यमाहुतं प्रजां देवि दिदिड्ढि नः ॥

"या त्वं देवानामसि स्वसा । सु असा स्वेषु सीदतीति वा"

(इति निरुक्तम्)

"या" "त्वं" "देवानां" "स्वसा" भगिनी माध्यमिकानाम् ।

(इति दुर्गाचार्य्यः)

अथाङ्गुलिनामानिः— "अग्रुवः" इत्यारभ्य "गभस्तयः" इति पर्य्यन्तम् द्वाविंशतिरङ्गुलिनामानि, निघण्टोः ३ अ० ५ पादस्य मध्ये "स्वसारः" अङ्गुलिनामसु दर्शनात् "स्वसारः" अङ्गुलीनां नामानि भवन्तीति वेदितव्यम् ।

"भगिनी स्वसा" इति (अमरकोषस्य द्वि० का० २६ श्लो०) सुष्ठु अस्यति अस्यते वा । "असु क्षेपणे" (दि० प० से०) "सावसेर्ऋन्" (उ० २।९६) इति स्वसृशब्दो निष्पन्नः ।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ विग्रहः अन्वयश्चः—भन्दते कल्याणं करोति यः स भद्रः, स्त्री चेद्भद्रा। "भदि कल्याणे" (भ्वा० आ० से) "ऋज्रेन्द्राग्र वज्र विप्र कुब्र चुब्र क्षुर खुर भद्रोग्र भेर भेल शुक्र शुक्ल गौर वम्रेरा मालाः" (१९६ उ०) रन्नन्ता ऊनविंशतिः। अत्र निपातनात् नलोपे 'भद्र' इति सिद्धम्। ततः अजाद्यतष्टाप्'' (४।१।४) इति टापि कृते 'भद्रा' च सिद्धम्। तया 'भद्रया' सृञ्ज्यानां कल्याणकारिण्या सह "सचमानः सचते नित्यसम्बन्धेन वर्तते यः स 'सचमानः' "षच समवाये" (भ्वा० प०) समवायः सम्बन्धः; स च नित्यसम्बन्धः। तेन नित्यसम्बन्धेन तया भद्रया सीतया सह वर्त्तमानः 'भद्रः' रामभद्रः विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः" इति रामपदस्य लोपे 'यः शिष्यते स लुप्यमानार्थाभिधायी' इति शिष्यमाणभद्रपदं लुप्यमानरामपदार्थस्य बोधकत्वेन "रामभद्रः" इत्युपस्थापयतीति वेदितव्यम्। "आगात्" अगमत् अरण्यमिति शेषः। "इण् गतौ" (अ० प० अ०) "इणो गाङ् लुङि" इति आङ् पूर्वकस्य इणो गादेशे अडागमे सिचो लोपे 'आगात् "इति सिद्धम्। अरण्याभिमानी वेदभगवान् वदति स्मारयति स्वाध्येतॄन्। एवं प्रति-कल्पं सीतया सह रामो वनमगात् ततः "जारो" रावणः "स्व-सारम्" "अभ्येति"। जीर्य्यति बाल्यादिस्ववयसा हानिं विनाशं करोति यः स जारः, रावणः "स्वसारम्" स्वसारम् स्वकीयबाल्याद्य-वस्थानां 'सारः' स्थिरांशः=स्थिरः त्रिकालेषु विकृतिरहितो योंशः स अर्थात् सर्वस्य दिव्यादिव्य (प्राकृताप्राकृत) कार्य्यजातस्योपपादिका ब्रह्मप्रकृतिप्रधानाऽपरनाम्नी सीतारूपांशः 'सारः' भगवदिच्छाशक्तिरूपः त्रिकालवर्ती नित्याऽनपायी। यो हि "एकोऽहं बहुस्याम्" इति भगवत्स-ङ्कल्पेन असंख्यातसहस्राणि ब्रह्माण्डानि रचयति तम् स्वसारम् 'अभि' तस्य समीपम् 'आगात्'=बाल्यादिवयसां हानार्थं परमपुरुषार्थभूतसायुज्य-मुक्त्यर्थम् आगमत्। "पश्चात्" स्वमोक्षोपायभूतां सीताम् आदाय लङ्कां गतवान्। तत्र रामेण सह युद्धं कृत्वा रामसायुज्यं प्राप्तवान्। "पश्चात्" नाम तदनन्तरम् सुप्रकेतैः द्युभिः सह रुशद्भिर्वर्णैर्युक्तः 'अग्निः' 'रामम्'

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

'अभि' रामस्य समीपे 'अस्थात्' उपस्थित इत्यन्वयः। "सुप्रकैतैः" सुप्रकेतयन्ति वह्नौ निवसन्ति = निवासं कुर्वन्तीति 'सुप्रकेता सु-प्र पूर्वकात् "कित निवासे रोगापनयने संशये च" (भ्वा० प० से०) कितेर्व्याधि-प्रतिकारे निग्रहे अपनयने नाशने संशये च" इति वार्तिकेन व्याधिप्रति-कारादिपञ्चार्थेषु 'कित' धातोः सन् प्रत्ययो भवति। अन्यत्रार्थे चुरादि-गणीयकितधातुर्मन्यते। तथात्र कौमुद्याम्:—"विनासे तु केतयति" अस्य तत्त्वबोधिन्याम् "अर्थान्तरे चुरादिरित्युक्तम् तदुदाहरति "केत-यतीति" अत्र निवासार्थकात् सु-प्र पूर्वकात् कितधातोः पचादित्वा-दचि उपधाया गुणे कृते सुप्रकेत इत्यस्य प्रातिपदिकसंज्ञायाम् राम-दाराणां विशेषणत्वेन आक्षिप्यमाणसह्यादियोगतया तृतीयाबहुवचने भिसि समागते 'सुप्रकेतैः' इति सिद्धम्। 'द्युभिः' दिव्यन्ति स्वभर्त्तु-रुत्कर्षं तद्द्वारेणैव देवकण्टकरावणं विजिगिषन्ति ये रामदाराः ते दिवः; तैः द्युभिः रामदारैः सह 'वितिष्ठन् विशेषेण तिष्ठन् विशेषणत्वञ्चात्र यदा प्रभृतितः रामेण वह्नौ निक्षिप्ता सीता तदा प्रभृतितः नोपविष्टवान्; किन्तु रामदाराणां गोपनार्थं सदा तिष्ठन् "रुशद्भिर्वर्णैः" रुशन्ति हिंसन्ति ये वर्णा आकृतयः ते रुशन्तो वर्णाः। तैर्युक्तो यो वह्निः तिष्ठन् आसीत् स "रामम् अभि" रामस्य सपीपे सन्निधौ "अस्थात्" उपर्युक्त-विशेषणविशिष्टाभिः रामदारैः सह रामस्य सन्निधौ उपस्थितोऽभूत्। निक्षेपरूपां सीतां रामाय दातुं रामसमीपमगमत्। यथा यस्य कस्य-चिद् रक्षार्थमुद्यतपुरुषस्य आकृती रोषाविष्टा प्रतिभाति; तथा वह्नेरपि रक्षायामुद्यतत्वेन क्रोधाविष्टाऽऽकृतिरभूत् इति 'रुशद्भिर्वर्णैः" इत्यनेन सूचितम्। "वितिष्ठन्" घटकवीत्युपसर्गेण रक्षायां सदा तत्परता प्रदर्शिता। निक्षेपधर्तृभिर्जनैरेवं भवितव्यम् इत्यपि उपदिष्टवान् भगवान् वेदः।

इति विग्रहोऽन्वयश्च

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

अथ 'भद्रो भद्रयेति' मन्त्रे स्वरसञ्चारः ।

१—भद्रः—भन्दते कल्याणं करोतीति विग्रहे

भदि कल्याणे सुखे च (भ्वा० आ० से०) ऋज्रेन्द्राग्रवज्रविप्र (१६६,उ०) इति रन्नन्तो निपातितः। तेन नलोपे रामश्चासौ भद्रश्च रामभद्रः कर्मधारयसमासे "विनापि प्रत्ययं पूर्वोत्तरपदयोर्लोपो वाच्यः" इति रामस्य लोपेऽपि भद्रशब्दो जगदाधारब्रह्मणो रामस्य वाचकः। अत्र धातोः" इत्यन्तोदात्तो भद्रधातुः—रनि कृते "आद्युदात्तश्च" इत्याद्युदात्तो र इति ततः" ञ्नित्यादिर्नित्यम्" इति प्रातिपदिकस्वरेणाद्युदात्तः प्राप्तो भद्रशब्दस्तथापि "उणादयोऽव्युत्पन्नानि प्रातिपदिकानि" इति सिद्धान्तात् "फिषोऽन्त उदात्तः" (फि० सू० १) इत्यन्तोदात्तत्वे "अनुदात्तं पदमेकवर्जम्" इति भकारोत्तरवर्त्यकारेऽनुदात्ते भद्र इति सिद्धम्। कर्मधारयसमासेऽपि रामभद्रशब्दः, "समासस्य" इत्यन्तोदात्त एव।

२—भद्रया—पूर्वोक्तप्रकारेण निष्पन्नभद्रशब्दाट्टापि "अनुदात्तौ सुप्पितौ" इत्यनुदात्तः टाप आकारः उदात्ताकारेण सह "अकः सवर्णे दीर्घः" इति दीर्घाकारे "एकादेश उदात्तेनोदात्तः" इत्याकार उदात्तः ततष्टाविभक्तौ "अनुदात्तौ सुप्पितौ" इत्यनुदात्ता विभक्तिः "आङि चापः" इत्येत्वेऽयादेशे भद्रया इति सिद्ध्यति।

३—सचमानः—षच समवाये, भौवादिकात्मनेपदी "धातोः" अन्तोदात्तः ततः शानचि प्रत्ययस्वरेणाद्युदात्तः तेन नकारोत्तरवर्त्यकारोऽनुदात्तः। शपि मुकि शपोऽकारः "अनुदात्तौ सुप्पितौ" इत्यनुदात्तः "सकारोत्तरवर्त्यकारो धातुस्वरेणोदात्तः तेन "उदात्तादनुदात्तस्य स्वरितः" इति शपोऽकारस्य स्वरितत्वे प्रातिपदिकत्वात् सौ रुत्वे विसर्गे च सचमानः इति।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

४—आ—आङिति "निपाता आद्युदात्ताः" (फि० सू०) इत्याद्युदात्तः।

५—अगात्—आङ्पूर्वकादिण्धातोर्लुङि तिपि 'इणो गा लुङि' इति गादेशे "लुङ् लङ् लृङ्क्ष्वडुदात्तः" इत्यडागमे धातोरित्यन्तस्योदात्तत्वे "तिङ्ङतिङः" इत्यानिपातरूपपदात् परस्यागादित्यस्य निघातत्वे "अकः सवर्णे दीर्घः" इति निपाताकारागमाकारयोः दीर्घे "एकादेश उदात्तेनोदात्तः" इत्युदात्त एव दीर्घः, ततश्च आगात् इति सिद्धम्।

६—स्वसारम्—सुष्ठु-अस्यति, अस्यते वेति विग्रहे सुपूर्वकादस् धातोः "सावसेर्ऋन्" (उ० २।९६) इति प्रत्ययस्वरेणाद्युदात्त ऋन् प्रत्यये "निपाता आद्युदात्ताः" (फि० सू०) इत्याद्युदात्तः सुनिपातः, धातोरित्यन्तोदात्तोऽसुघटकाकारः। यणि "अनुदात्तं पदमेकवर्जम्" इत्यनुदात्तः सुघटककारः। ततः "उदात्तादनुदात्तस्य स्वरितः" इति—ऋकारस्य स्वरितत्वे प्रातिपदिकत्वादमि "अनुदात्तौ सुप्पितौ" इत्यनुदात्तत्वे, गुणे दीर्घे स्वसारमिति सिद्धम्।

अथवा—

स्वसारम्—स्वशब्दः सर्वनामत्वेन "स्वाङ्गशिटामदन्तानाम् (फि० सू० २६) इत्याद्युदात्तः। सरति कालान्तरमिति विग्रहे "सृ स्थिरे (३।३।१७) इति कर्तरि घञि सार इति, स्वस्य सार इति विग्रहे समासे 'समासस्य" इत्यन्तोदात्तः। अनुदात्तं पदमेकवर्जम्, इत्यनुदात्तः प्राप्तस्तथापि छान्दसत्वात् स्वशब्द आद्युदात्त एव तथा "उदात्तादनुदात्तस्य स्वरितः" इति साघटकाकारः स्वरित इति।

७—जारः। जॄ वयोहानौ चौरादिकाण्ण्यन्तात् जारयतीति विग्रहे "दारजारौ कर्तरि णिलुक् च" इति वार्तिकेन कर्तरि घञि णेर्लुकि जार इति। अत्र णौ वृद्धौ—आकारस्य मितां ह्रस्वः" इति ह्रस्वे पश्चात् घञ् नैमित्तिका वृद्धिः तेनाकारवत्त्वात् "कर्षात्वतो घञोऽन्त उदात्तः, ६।१।१५९। इत्यन्तोदात्तत्वेनाद्यनुदात्तः।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

८—अभि—फिषोऽन्त उदात्तः, इत्यस्यापवादकेन "निपाता आद्युदात्ताः" अनेनाद्युदात्तत्वे प्राप्ते "उपसर्गाश्चाभिवर्जम्। फि-सू ८१ निषेधेनान्तोदात्तोऽभिनिपातः 'अनुदात्तं पदमेकवर्जम्' इत्यकारोऽनुदात्तः

९—एति—आदादिकेण् गतौ धातोर्लटि तिपि शपि लुकि गुणे—एति। अस्य धातोरेकारः "धातोः" इत्यन्तोदात्तः "अनुदात्तौ सुप्पितौ" इत्यनुदात्तः तिविकारः। 'तिङ्ङतिङः' इति अभिपदात् परस्यैति समुदायस्य निघातत्वे यणि "उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य" ८।२।४। इत्येकारस्य स्वरितत्वे 'स्वरितात्संहितायामनुदात्तानाम्' इत्येकश्रुतिः ततः—अभ्येति इति सिद्धम्।

१०—पश्चात्—अपरस्मादिति विग्रहे "अपर ङसि-इत्यस्मात् पश्चात ५।३।३२। इति अपरस्य पश्चभावे-आतिप्रत्यये तद्धितान्तत्वात् प्रातिपदिकत्वे विभक्तेर्लुकि दीर्घे पश्चात्-इति। यद्यप्यपरशब्दः "स्वाङ्गशिटामदन्तानाम्, (फि. सू.,) इति अन्तोदात्तः— आतिश्च प्रत्ययस्वरेणाद्युदात्तस्तथापि "फिषोऽन्त उदात्तः"। इत्यन्तोदात्तत्वेनाद्यनुदात्तः।

११— सुप्रकेतैः। सुप्र-पूर्वकात् कित् निवासे रोगापनयने च इत्यस्मात् निवासार्थात् "नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः" इत्यचि गुणे गतिसमासे सुप्रकेत इति-अत्र सुप्रौ "निपाता आद्युदात्ताः" इत्युदात्तौ धातुस्वरेण धातोरेकार उदात्तः। "चितः" इति सुप्रकृतिकस्यान्तोदात्तत्वे "अनुदात्तं पदमेकवर्जम्' इत्यन्तमुदात्तं विहाय सर्वेषामनुदात्तत्वे भिसि ऐसः सुप्त्वादनुदात्तत्वे वृद्धौ "एकादेश उदात्तेनोदात्तः" इत्यैकार उदात्तः। सुप्रकेतैः—इति।

१२—द्युभिः। दीव्यतीति द्यौः दिव्धातोः "दिवेर्डिविः" डिवि प्रत्यये टिलोपे दिव् प्रातिपदिकं "फिषोऽन्त उदात्तः" इत्यन्तोदात्तं तस्मात्

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

भिसि पित्त्वे नानुदात्ते "सावेकाचस्तृतीया दिर्विभक्तिः" इत्युदात्तत्वे प्राप्ते "दिवो झल्" ६।१।१८३। इत्युदात्तत्वनिषेधे "दिव उत्" इति वस्योत्वे यणि द्युभिरत्र उदात्तादनुदात्तस्येति भिस् घटकेकारः स्वरितः।

१३—अग्निः अगि लक्षणे भौवादिकात् "अङ्गे र्नलोपश्च" इति निप्रत्ययान्तोऽग्निशब्दः "आद्युदात्तश्च ३।१।३। इति निघटकेकारस्योदात्तत्वे "अनुदात्तं पदमेकवर्जम्" इत्यकारोऽनुदात्तः। सौ अग्निः।

१४—वि—निपातो "निपाता आद्युदात्ताः" इत्याद्युदात्तत्वे प्राप्ते तं बाधित्वा 'चादयोऽनुदात्ताः।८४। फि० सू०।' अनुदात्तत्वे वि—इति

१५—तिष्ठन्—यद्यपि विपूर्वक ष्ठागतिनिवृत्योः इत्यस्मात् "समवप्रविभ्यः स्थ;" इत्यनेनात्मनेपदविधानं कृतं तथापि छान्दसत्वात्तदभावे 'धात्वादेः षः सः' इति सत्वे षरूपनिमित्तापाये नैमित्तिकस्य ठस्यापि निवृत्तिः अकृतव्यूहपरिभाषया, तथा च स्थाधातोः लटि "लटः शतृशानचावप्रथमा समानाधिकरणे" ३।२।१२४ इति शत्रादेशे शपि पाघ्राध्मास्थाम्नाः ७।३।७८।इति तिष्ठादेशे धातुस्वरेणान्तोदात्तः, शपि "अनुदात्तौ सुप्पितौ।" इति शबनुदात्तः, शतुरवयवोऽकारः "आद्युदात्तश्च।३।१।३।" इति प्रत्ययस्वरेणाद्युदात्तः प्राप्तः तं प्रबाध्य "तास्यनुदात्तेन्ङिद्दुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः।६।१।१८६।" इत्यनुदात्तत्वे शबकारस्य पररूपेऽप्यान्तरतम्यादनुदात्त एवाकारे प्रातिपदिकत्वात्सौ नुमि सुलोपे संयोगान्तलोपे तिष्ठन्—इति सिद्ध्यति।

१६—रुशद्भिः—रुश् हिंसायां तौदादिकः "धातो" रित्यन्तोदात्तः तस्माल्लटि शत्रादेशे "तुदादिभ्यः शः," इति शप्रत्यये प्रत्ययस्वरेण शकाराकार उदात्तः प्राप्तः पररूपविशिष्टः तस्य "तास्यनुदात्तेन्ङिद्दुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः ।६।१।१८६। इत्यनुदात्तत्वे "उदात्तवन्-

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दात्तस्य स्वरितः" इति स्वरितत्वे प्रातिपदिकत्वाद्भिसि "अनुदात्तौ सुप्पितौ" इति भिस इकारोऽनुदात्तो, रुत्वे विसर्गे च रुशद्भि रिति सिद्धम् ।

१७—वर्णैः—व्रियतेऽनेनेति विग्रहे वृञ् वरणे स्वादिधातोः "कृपृवृदृशिभ्यो नः ।३।१०। इति न प्रत्यये गुणे रपरत्वे णत्वे "वृषादीनाञ्च ।६।१।२०५ आकृतिगणत्वात् आदेरुदात्तत्वे "अनुदात्त पदमेकवर्जम्" इत्यन्तस्यानुदात्तत्वे भिसि—ऐसादेशे वृद्धौ रुत्वे विसर्गे च भिसः सुप्त्वादनुदात्तत्वेन आन्तरतम्याद्वृद्धिरप्यनुदात्ता ततः—उदात्तादनुदात्तस्य स्वरितः—इति स्वरितत्वे वर्णैः इति सिद्धम्

१८—अभि—निपाता आद्युदात्ताः । फि० सू० ८०। आद्युदात्तत्वे प्राप्ते तं प्रबाध्य "उपसर्गाश्चाभिवर्जम् । ८१। फि० सू० । इति निषेधेनान्तोदात्तत्वे "अनुदात्तं पदमेकवर्जम्" आद्यकारानुदात्तः ।

१९— रामम्—रमन्ते योगिनो यस्मिन् चिदात्मनि—इति विग्रहे "करणाधिकरणयोश्च" इत्यधिकरणे घञि—उपधावृद्धौ "कर्षात्वतो घञोऽन्त उदात्तः ।६।१।१५९। इत्यन्तोदात्तत्वे "अनुदात्तं पदमेकवर्जम् । ६।१।१५८ इत्यादेरनुदात्तत्वे प्रातिपदिकत्वादमि पूर्वरूपे रामम्—इति सिद्धम् ।

२०—अस्थात्—ष्ठा गतिनिवृत्त्योः—इति भौवादिकात् "धात्वादेः षः सः" इति सत्वे अकृतव्यूहपरिभाषया ष्टुत्वस्य निवृत्तौ "लुङि तिपि च्लौ सिचि गातिस्था घुपाभूभ्यः" इति सिचो लुकि "इतश्च" इतीकारलोपे "लुङ्लङ् लृङ्क्ष्वडुदात्तः" इत्यडागमे "धातोः" इत्यन्तोदात्तत्वे "अनुदात्त पदमेकवर्जम्" इत्यकारोऽनुदात्तः ततः—रामघटकाकारोदात्तात्परस्यानुदात्तस्य, "उदात्तादनुदात्तस्य स्वरितः" इति स्वरितत्वे—अस्थात्—इति सिद्धम् ।

इति स्वरसंचारः

इति 'मन्त्रतत्त्वचिन्तामणिः' समाप्तः

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

परिशिष्टम्

श्रीरामचन्द्रपदपद्मपरागमृष्टो, वैराग्यशान्तभववासन आत्मतुष्टः।
लोके सदा परमहंसपदेन ख्यातो, दासान्तयुक्तबलभद्रगुणावदातः॥
आसीत्तथा सकलशास्त्रविचारदक्षः,स्वाध्यायवान् परमनैष्ठिकसद्विवक्षः।
राजाधिराजबुधराजसभाजितस्सन्,काश्यां समालभत मुक्तिपदं महात्मा॥

तेन खलु महात्मना वैकुण्ठाधिवासात्कञ्चित् कालं पूर्वं 'ब्रह्ममुखपरिचयस्तत्त्वचिन्तामणिश्चेति ग्रन्थद्वयं निर्माय मुद्रयितुञ्च तत्सार्धैकशतं रूप्यकं दत्वा मुद्रणालय आदिष्टः, परन्तु दैवयोगात् तन्न प्रकाशितमभवत् तज्जीवनकाल इत्यासीच्चिन्ताविषयः। अधुना कतिपयैः सज्जनैर्बौद्धिकमार्थिकञ्च साहाय्यं प्रदाय येन केनापि प्रकारेण मुद्रापयित्वा समुपस्थाप्यते भवतां समक्षे तद्रत्नद्वयमित्यस्ति महान् सन्तोषविषयः। यद्यपि रचयितुरभावे तद्रचनाया मुद्रणे त्रुटिः स्वाभाविकी तत्रापि तद्विषयस्यानभिज्ञत्वात्स्यादेव बहुषु स्थलेषु स्खलनमित्यस्तु यथाकथंचिदुपेक्षाविषयस्तथापि पतिपाद्यविषयस्याभूतपूर्वत्वादवश्यमेवामोदमावहेदिदं विदुषामित्याशासे।

अभूतपूर्वत्वञ्च ब्रह्ममुखपरिचये गायत्रीमन्त्रस्य, मन्त्रतत्त्वचिन्तामणौ कतिपयवेदोपनिषन्मन्त्राणां रामपरकत्वव्याख्यानात्स्पष्टम्। नास्त्यत्र ग्रन्थकर्त्तुः रागद्वेषलेशोऽपि यतस्तेनोदारहृदयेन कस्मिंश्चित्पृष्ठे निम्नश्लोका लिखितास्तथा हि—

"श्रीमतां गुरुवर्य्याणां पादद्वन्दं प्रयत्नतः।
स्मृत्वा स्मृत्वा प्रणम्यैव मन्त्रार्थश्चिन्त्यतेऽधुना॥
विलिख्यते भयादेव विस्मृतिर्नैव जायताम्।
विस्मृतेर्बलभद्रस्य पापं लगति विस्मृतेः॥
परेषां नहि तुष्ट्यर्थं किञ्चिद्यत्नो मया कृतः।
आत्मतुष्टिर्यथा मेस्यात्तथा यत्नो मया कृतः।"

तथा च प्रकृतग्रन्थमुद्रणे यः समयातिक्रमोऽन्याश्च त्रुटयस्तत्राहमेवोत्तरदायीति—

गंगादशहरा
भौमवारः सं० २०१२
विक्रमः

क्षमापयति भवतामनुचरः
व्यवस्थापकः
काशीराजमुद्रणालयस्य

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गायत्री मन्त्र की वाक्य-योजना का भाषानुवाद

"हे ई हे माता लक्ष्मी ! यः जो,, श्रुतिस्मृतियों में प्रसिद्ध 'सविता' शुद्ध एवं मलिन उभयात्मक विभूति के स्रष्टा, 'देव' त्रिपाद विभूति के ऊपरी भाग में (स्थित) आथर्वण-मन्त्र-प्रतिपादित अपराजिता—अयोध्या—नामक परात्पर धाम में द्योतमान् [प्रकाशमान्], 'र' शुद्ध एवं मलिन उभयात्मक विभूति में रममाणत्व से, रमयितृत्व से, वा राजमानत्व से श्रुतिस्मृतियों में प्रसिद्ध 'र' राम 'धियः' धीमानों की बुद्धियों को प्रचोदयात् प्रेरित करते हैं, तत् उन सवितुः शुद्ध और मलिन करके प्रसिद्ध उभय विभूति के, 'मैं एक हूँ बहुत हो जाऊं' इस संकल्प से उत्पन्न करने वाले, देवस्य अयोध्यानामक परात्पर धाम में द्योतमान [प्रकाशमान], र=रस्य—उभयविभूति की सृष्टि करके उसमें अनुप्रविष्ट होकर रममाण [रमण करने वाले], राजमान [प्रकाशित होने वाले], वा रमयिता [रमानेवाले], अथवा उपासकों को अर्थ, धर्म, काम, तथा मोक्ष के 'रातु' देनेवाले राम के, भर्गः स्वपरस्वरूप की अवरोधिका जो अविद्या, उसके साथ (ही) उसके कार्यसमूह के (भी) भर्जक [नाशक], एयम् ध्यान करने वाले अर्थधर्मकाम-मोक्षार्थी उपासकों से ध्येयरूप से प्राप्य सच्चिदानन्दघन दिव्य मङ्गलविग्रह का व जिस प्रकार से धीमहि हम ध्यान करें [कर सकें] वैसा नः हम लोगों को—।" करो [बना दो], यह अवशिष्ट पद है।

भावार्थ

सीतास्वरूपा भगवती लक्ष्मी से यह प्रार्थना है कि मंत्रोपासक को इस योग्य कर दें जिससे कि वह निखिल सृष्टि के उत्पादक, प्रेरक एवं तदन्तर्गत प्रकाशमान राम के उस सच्चिदानन्दघन मंगलविग्रह का ध्यान कर सके जो अविद्या एवं उसके कार्यसमूह का नाशक है तथा धर्मार्थकाममोक्षार्थी उपासकों एवं योगियों का प्राप्य है।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

प्राप्तिस्थानम्—

१—पं० श्रीरामरत्नदासः न्यायाध्यापकः
महाविद्यालयः तरेतपाली, पटना।

२—काशीराजमुद्रणालयः
रामनगर दुर्गः, काशी।

RajGuru Math, Shivala, Varanasi Collection. Equipment: Heritage Foundation, Jalgaon.